# संस्कृतव्याकरणेषु समासे पूर्वनिपातसमान्यविधिः

**डा. प्रसेनजित्-नियोगी (Dr. Prosenjit Neogi)**

**अध्यापकः, संस्कृतविभागः, अघोरकामिनीप्रकाशचन्द्रमहाविद्यालयः, वेङ्गाइ, हुगली**

**(Asst. Prof. in Sanskrit, A.K.P.C. Mahavidyalaya, Bengai, Hooghly)**

**प्रबन्धसारः**

एकाधिकानां समर्थानां पदानामेव समासो विधीयते। परन्तु समस्यमानानां पदानां मध्ये कस्य पूर्वनिपातः कस्य वा परनिपातो भवति इति प्रश्ने उत्थिते आचार्यपाणिनिना उपसर्जनसंज्ञाविधायकानि सूत्राणि विरचितानि। अत्र हि द्विविधा उपसर्जनसंज्ञा विहिता। प्रथमविधमुपसर्जनसंज्ञाविधायकं सूत्रं हि - "प्रथमानिर्दिष्टं समास उपसर्जनम्" इति। समाससूत्रे प्रथमया विभक्त्या निर्दिष्टं पदमुपसर्जनसंज्ञं स्यात्। यथा "पञ्चमी भयेन" इति सूत्रे पञ्चम्यन्तपदस्य प्रथमानिर्दिष्टत्वात् उपसर्जनसंज्ञा। उपसर्जनं पूर्वम् इति सूत्रेण उपसर्जनसंज्ञकस्य पूर्वनिपातः स्यात्। श्रीहरिनामामृतव्याकरणे पूर्वनिपातविषये सूत्रितम्- "सूत्रे तृतीयान्तेन प्रथमान्तं समस्यते तच्च पूर्वम्" इति। अस्य वृत्तौ उच्यते - "समासविधानसूत्रे तृतीयान्तेन सह प्रथमान्तं समस्यते। इति सर्वत्र ज्ञेयम्। तच्च पूर्वं निपात्यम्" इति। तथाहि समासविधायकसूत्रे तृतीयाविभक्त्यन्तपदेन सह प्रथमाविभक्त्यन्तपदस्य समासो भवतीति। तत्र प्रथमाविभक्त्यन्तपदेन निर्दिष्टस्य समस्यमानशब्दस्यैव पूर्वनिपातो भवेत् इति। सुपद्मव्याकरणे समस्यमानपदयोः पूर्वनिपातविषये सूत्रितम् - "प्रथमा पूर्वं समासे" इति। "समाससूत्रे प्रथमानिर्दिष्टं यत् पदं, तत् पदं पूर्व्वं निपतति" इति अस्य सूत्रस्य वृत्तिः। अर्थात् समासविधायकसूत्रे प्रथमाविभक्त्यन्तेन पदेन निर्दिष्टं यत् समस्यमानपदं तस्य पूर्वनिपातो विधेयः। आशुबोधव्याकरणे पूर्वनिपातविषये उजसर्जनसंज्ञाविधायकं सूत्रं सूत्रितम् - "अमुख्यं समासविधौ प्रथमानिर्दिष्टश्चोपसर्जनं तत्र प्रथमानिर्दिष्टस्य प्राक्प्रयोगः" इति। तथाहि समासविधायके सूत्रे प्रथमया विभक्त्या निर्दिष्टं पदम् उपसर्जनसंज्ञं भवति। तस्य च पदस्य पूर्वनिपातो भवतीति। सारस्वतव्याकरणे

पूर्वनिपातविषये वृत्तावुल्लिखितम् -"अन्यच्च, यत् प्रतिपदं प्रधानं तस्य पदस्य सर्वत्र समासे पूर्वनिपातो वक्तव्य इति" इति। अर्थात् समासविधानकाले समस्यमानपदयोर्मध्ये यस्य प्राधान्यं भवति तस्यैव पूर्वनिपातो भवतीति पूर्वनिपातसामान्यनियमः।

अत्रेदमवधेयं यत् आचार्यपाणिनिना आदौ समासशास्त्रे प्रथमान्तस्य उपसर्जनसंज्ञा विहिता तत्परं तस्य पूर्वनिपातो विहितः। किन्तु हरिनामामृतव्याकरणे सुपद्मव्याकरणे सारस्वतव्याकरणे च प्रथमान्तस्य प्रधानस्य च साक्षादेव पूर्वनिपातो विहितः। आशुबोधव्याकरणे पुनः पाणिनीयरीत्या आदौ उपसर्जनसंज्ञा तदनन्तरं च तस्य पूर्वनिपातो विहितः किन्तु एकेनैव सूत्रेण । अत्रायं प्रश्नः जागर्ति यत् "प्रथमानिर्दिष्टं समासे प्राक्" इत्येवं सूत्रमेव पाणिनिना कथं न कृतम्? समासशास्त्रे प्रथमान्तस्य पूर्वनिपाते विवक्षिते तदेव करणीयमासीत्। अत्र संज्ञाकरणस्य किं प्रयोजनमित्येव प्रश्नः। ननु "एकविभक्ति चापूर्वनिपाते" इति सूत्रे "प्रथमानिर्दिष्टं समास उपसर्जनम्" इत्यतः 'समासे', 'उपसर्जनं' चेति पदद्वयम् अनुवर्तते। अतः "प्रथमानिर्दिष्टं समास उपसर्जनम्" इति सूत्रं न स्याच्चेत् तादृशी व्यवस्था न स्यात् । अत्रेदमुच्यते तर्हि "एकविभक्ति समासे चापूर्वनिपाते उपसर्जनम्" इत्येवं सूत्रमस्तु । तेन तस्यैव एकस्य उपसर्जनसंज्ञा स्यात्। "गोस्त्रियोरुपसर्जनस्य" इति तस्य फलमस्तु इति सुधीभिः भाव्यम्। अत्र साम्प्रदायिकैः वक्तुं शक्यते स्वतन्त्रेच्छस्य मुनेः अपर्य्यनुयोज्यत्वात् नैषा शङ्का समुचिता। वस्तुतस्तु न केवलं पूर्वनिपातः, "अनुपसर्जनात्" (४/१/१४) इत्यपि उपसर्जनसंज्ञाफलम् अन्वेषणीयम् इति ।

## कुञ्चीशब्दाः

समासः, उपसर्जनम्, पूर्वनिपातः, श्रीहरिनामामृतव्याकरणम्, सुपद्मव्याकरणम्, आशुबोधव्याकरणम्, सारस्वतव्याकरणम्।

## भूमिका

संस्कृतव्याकरणे संज्ञापरिभाषासन्धिकारकसमासधात्वर्थादिविषयेषु अन्यतमत्वं भजते समासः। एकाधिकानां समर्थानां पदानामेव समासो विधीयते। परन्तु समस्यमानानां पदानां मध्ये कस्य पूर्वनिपातः कस्य वा परनिपातो भवति इति प्रश्ने उत्थिते आचार्यपाणिनिना उपसर्जनसंज्ञाविधायकानि सूत्राणि विरचितानि। वस्तुतस्तु उपसर्जनशब्दस्य अर्थो हि अप्रधानमिति। किन्तु पाणिनीयव्याकरणे अस्य शब्दस्य पारिभाषिकः कश्चन अर्थो वर्तते। अत्र हि द्विविधा उपसर्जनसंज्ञा विहिता।

## आलोचनम्

प्रथमविधमुपसर्जनसंज्ञाविधायकं सूत्रं तावत् - "प्रथमानिर्दिष्टं समास उपसर्जनम्"(१/२/४३)१ इति। समास उपसर्जनम् – समासे उपसर्जनम् इति। अत्र समासपदं तद्विधायके लाक्षणिकम्। समासः प्रतिपाद्यत्वेन वर्तते यत्र स समासः (अर्श आदिभ्योऽच्) समासविधायकसूत्रमित्यर्थः। तदुक्तं सारदारञ्जनविद्याविनोदेन मितभाषिणीव्याख्यायाम् – "इह समास इति लक्षणया समासशास्त्रं समासप्रकरणोक्तानि सूत्राणि"२ इति। अतः समाससूत्रे प्रथमया विभक्त्या निर्दिष्टं पदमुपसर्जनसंज्ञं स्यात्। अर्थात् समासविधायकसूत्रे प्रथमान्तं यत् पदं तेन पदेन उदाहरणे यत् पदं सूचितं भवति तदेव उपसर्जनपदवाच्यं भवति। यथा "पञ्चमी भयेन"३ इति सूत्रे तथा "अव्ययं विभक्तिसमीपसमृद्धिव्यृद्ध्यर्थाभावात्ययासम्प्रतिशब्दप्रादुर्भावपश्चाद्यथानुपूर्व्यसादृश्यसम्पत्तिसाकल्यान्तवचनेषु"४ (२/१/६) इति सूत्रे यथाक्रमेण पञ्चम्यन्तपदस्य अव्ययपदस्य च यथाक्रमेण प्रथमानिर्दिष्टत्वात् उपसर्जनसंज्ञा। व्याघ्रात् भयम्- व्याघ्रभयम्, कृष्णस्य समीपम्- उपकृष्णम् इत्यादौ प्रस्तुतेन सूत्रेण यथाक्रमेण व्याघ्रपदस्य उप इति अव्ययस्य च उपसर्जनत्वम्।

अस्या उपसर्जनसंज्ञायाः फलं हि "उपसर्जनं पूर्वम्"(२/२/३०)५ इति सूत्रम्। समासे उपसर्जनं प्राक् प्रयोज्यमिति अस्य भट्टोजिदीक्षितकृता वृत्तिः। अतोऽनेन सूत्रेण उपसर्जनसंज्ञकस्य पूर्वनिपातो भवति।

अस्य पूर्वनिपातनियमस्य अपवादसूत्रं तावत् - "राजदन्तादिषु परम्"(२/२/३१)६ इति। उपसर्जनसंज्ञकस्य पूर्वनिपात एव भवति, परन्तु राजदन्तादिशब्दे उपसर्जनसंज्ञकस्य पूर्वनिपातो न भवति परनिपात एव स्यात्। तदुक्तं वृत्तिकृता आचार्यभट्टोजिदीक्षितेन- "एषु पूर्वप्रयोगार्हं परं स्यात्" इति। राजदन्तादिः आकृतिगणः, सर्वसमासव्यभिचार एव अस्मिन् गणेऽन्तर्भवति। अतः सर्वे व्यभिचारा अनेनैव सूत्रेण समर्थनीयाः इति। तथाहि समासेषु व्यभिचारो यथा –

तत्पुरुषे - ऋणे उत्तमः - उत्तमर्णः, ऋणे अधमः - अधमर्णः इति।

बहुव्रीहौ - कण्ठे श्रीर्यस्य सः - श्रीकण्ठः इति।

द्वन्द्वे - अर्यश्च शूद्रश्च - शूद्रार्यम् राजा च स्नातकश्च - स्नातकराजानौ, पतिश्च जाया च - जायापती इति।

द्वितीयविधाया उपसर्जनसंज्ञाया लक्षणमुक्तं आचार्यपाणिनिना- "एकविभक्ति चापूर्वनिपाते"७ इति। विग्रहे यन्नियतविभक्तिकं तदुपसर्जनसंज्ञं स्यात्, न तु तस्य पूर्वनिपातः इति अस्य सूत्रस्य आचार्यदीक्षितकृता वृत्तिः। नियता निश्चिता विभक्तिर्यस्मिन् तन्नियतविभक्तिकम्। यथा दिशयोः मध्यं, दिशयोः मध्येन, दिशयोः मध्यात्, दिशयोः मध्ये वा अपदिशम् इत्यत्र विग्रहवाक्ये दिशाशब्दस्य विभक्तिः अपरिवर्तिता, अतस्तत् नियतविभक्तिकम्। तस्यापि उपसर्जनसंज्ञा अनेन सूत्रेण विहिता। अस्य उपसर्जनस्य तु पूर्वनिपातो न भवेत्, परनिपात एव भवति। अव्ययीभावसमासे प्रायः सर्वत्रैव एष एव पूर्वपरनिपातनियमः परिदृश्यते।

**श्रीजीवगोस्वामिविरचिते श्रीहरिनामामृतव्याकरणे** पूर्वनिपातविषये सामान्यतः सूत्रितम्- "सूत्रे तृतीयान्तेन प्रथमान्तं समस्यते तच्च पूर्वम्"८ इति। अस्य वृत्तौ उच्यते - "समासविधानसूत्रे तृतीयान्तेन सह प्रथमान्तं समस्यते। इति सर्वत्र ज्ञेयम्। तच्च पूर्वं निपात्यम्" इति। तथाहि समासविधायकसूत्रे तृतीयाविभक्त्यन्तपदेन सह प्रथमाविभक्त्यन्तपदस्य समासो भवतीति। तत्र

प्रथमाविभक्त्यन्तपदेन निर्दिष्टस्य समस्यमानशब्दस्यैव पूर्वनिपातो भवेत्। तद्यथा - "विशेषणं तुल्याधिकरणेन" इति कर्मधारयसमासविधायके सूत्रे विशेषणपदस्य प्रथमान्तत्वात् अनेन निर्दिष्टस्य समस्यमानपदस्यैव पूर्वनिपातः प्रस्तुतनियमेन। यथा श्यामश्चासौ रामश्चेति, रामश्चासौ श्यामश्चेति वा विग्रहे विशेषणभूतस्य श्यामशब्दस्यैव पूर्वनिपातः।

**सुपद्मव्याकरणे** समस्यमानपदयोः कस्य पूर्वनिपातो भवेदिति आशङ्कायां प्रथमतः सूत्रितम् - "प्रथमा पूर्वं समासे"९ इति। "समाससूत्रे प्रथमानिर्दिष्टं यत् पदं, तत् पदं पूर्व्वं निपतति" इति अस्य सूत्रस्य वृत्तिः। अर्थात् समासविधायकसूत्रे प्रथमाविभक्त्यन्तेन पदेन निर्दिष्टं यत् समस्यमानपदं तस्य पूर्वनिपातो विधेयः। अत्रेदमवधेयं यत् पृथक्तया उपसर्जनसंज्ञा न कृता ग्रन्थकारेण। आचार्यपाणिनिना तु आदौ "प्रथमानिर्दिष्टं समास उपसर्जनम्" इति प्रथमानिर्दिष्टस्य उपसर्जनसंज्ञा विहिता ततः "उपसर्जनं पूर्वम्" इति उपसर्जनसंज्ञकस्य पूर्वनिपातो निर्दिष्टः। उदाहरणं यथा - स्त्रीषु अधिकृत्य या कथा प्रवर्तते इति विग्रहे "अव्ययं सप्तम्यनुक्रमसमीपपश्चाद्यथात्ययाभावशब्दप्रकाशयौगपद्यसम्पद्सम्प्रतिसाकल्यान्तार्थेषु"१० इति समासविधायकसूत्रे 'अव्ययमि'ति प्रथमान्तपदेन निर्दिष्टस्य अधीति अव्ययस्य प्रस्तुतसूत्रेणैव पूर्वनिपाते अधिस्त्रि इति भवति।

**आशुबोधव्याकरणे** पूर्वनिपातविषये उजसर्जनसंज्ञाविधायकं सूत्रं सूत्रितम् - "अमुख्यं समासविधौ प्रथमानिर्दिष्टश्चोपसर्जनं तत्र प्रथमानिर्दिष्टस्य प्राक्प्रयोगः"११ इति। तथाहि समासविधायके सूत्रे प्रथमया विभक्त्या निर्दिष्टं पदम् उपसर्जनसंज्ञं भवति। तस्य च पदस्य पूर्वनिपातो भवति। तदुक्तं वृत्तौ - "समासविधायकशास्त्रे प्रथमानिर्दिष्टं च उपसर्जनसंज्ञं स्यात्। तयोः मध्ये प्रथमान्तपदस्य पूर्वप्रयोगः" इति।

तथाहि अव्ययीभावसमासविधायके "अव्ययं विभक्त्यर्थादिषु बहुलम् सोऽव्ययीभावः"१२ इति सूत्रे 'अव्ययम्' इति पदं प्रथमान्तम् अतः अनेन प्रथमान्तपदेन निर्दिष्टम् अधिदेहम्, उपग्रामम् इत्यादौ यथाक्रमेण अधि, उप चेति अव्ययपदद्वयस्य उपसर्जनत्वं पूर्वनिपातत्वञ्च।

**सारस्वतव्याकरणे** प्रथमतः समासलक्षणादिविषये विचारं कृत्वा स्त्रियमधिकृत्य इति विग्रहे अधिशब्दस्य स्त्रीशब्दस्य वा पूर्वनिपातो भवेदिति प्रश्ने उत्थिते समाहितम् – "कृते समासेऽव्ययानां पूर्वनिपातो वक्तव्यः"१३ इति।तेन स्त्रियमधि इत्युच्चार्य विग्रहे कृते अव्ययीभूतस्य अधिशब्दस्यैव पूर्वनिपातो भवेत्। किञ्च, साधारणतः समासे कस्य पूर्वनिपातो भवेदिति विषये ग्रन्थकारेण वृत्तौ उल्लिखितम् – "अन्यच्च, यत् प्रतिपदं प्रधानं तस्य पदस्य सर्वत्र समासे पूर्वनिपातो वक्तव्य इति"१४ इति। अतएव समासविधानकाले समस्यमानपदयोर्मध्ये यस्य प्राधान्यं भवति तस्यैव पूर्वनिपातो भवतीति पूर्वनिपातसामान्यनियमः। अत्र अधि-स्त्रीपदयोर्मध्ये अधिशब्दस्यैव प्राधान्यात् पूर्वनिपातः।

## पर्यवेक्षणम्

अत्रेदमवधेयं यत् पूर्वनिपातविषये आचार्यपाणिनिना "प्रथमानिर्दिष्टं समास उपसर्जनम्" इति उपसर्जनसंज्ञकस्य समासशास्त्रे प्रथमानिर्दिष्टस्य "उपसर्जनं पूर्वम्" इति सूत्रेण पूर्वनिपातो विहितः। हरिनामामृतव्याकरणे "सूत्रे तृतीयान्तेन प्रथमान्तं समस्यते तच्च पूर्वम्" इति सूत्रेण पाणिनिमार्ग एव समाश्रितः। ए सुपद्मव्याकरणे "प्रथमा पूर्वं समासे" इति सूत्रितम्। एवं सारस्वतव्याकरणेऽपि वृत्तौ "अन्यच्च, यत् प्रतिपदं प्रधानं तस्य पदस्य सर्वत्र समासे पूर्वनिपातो वक्तव्य इति" इति वाक्येन समस्यमानपदेषु प्रधानस्य पूर्वनिपातो विहितः। किन्तु इदमत्र अन्तरं यत् आचार्यपाणिनिना आदौ समासशास्त्रे प्रथमान्तस्य उपसर्जनसंज्ञा विहिता तत्परं तस्य पूर्वनिपातो विहितः। किन्तु हरिनामामृतव्याकरणे सुपद्मव्याकरणे च प्रथमान्तस्य साक्षादेव पूर्वनिपातो विहितः। आशुबोधव्याकरणे पुनः पाणिनीयरीत्या आदौ उपसर्जनसंज्ञा तदनन्तरं च तस्य पूर्वनिपातो विहितः किन्तु एकेनैव सूत्रेण – "अमुख्यं समासविधौ प्रथमानिर्दिष्टश्चोपसर्जनं तत्र प्रथमानिर्दिष्टस्य प्राक्प्रयोगः" इति। अत्रायं प्रश्नः जागर्ति

यत् "प्रथमानिर्दिष्टं समासे प्राक्" इत्येवं सूत्रमेव पाणिनिना कथं न कृतम्? समासशास्त्रे प्रथमान्तस्य पूर्वनिपाते विवक्षिते तदेव करणीयमासीत्। तेनैव कार्यसिद्धेः आदौ उपसर्जनसंज्ञाविधानार्थमेकं सूत्रं तदनन्तरं च तस्य पूर्वनिपातार्थम् अपरं सूत्रम् इति किं न गौरवम्? अत्र संज्ञाकरणस्य किं प्रयोजनमित्येव प्रश्नः। न च अणादिसंज्ञाकरणमपि तर्हि व्यर्थमिति वाच्यम् अन्येषु अनेकेषु सूत्रेषु अणादिसंज्ञाभिः संज्ञितानां लघुनोपायेन निर्देशप्रयोजनात् तादृशसंज्ञाकरणस्य आवश्यकत्वात्। अत्र तु केवलं पूर्वनिपात एव प्रयोजनम्। अतः "प्रथमानिर्दिष्टं समासे प्राक्" इत्येव कथं न सूत्रं क्रियते? ननु "एकविभक्ति चापूर्वनिपाते" इति सूत्रे "प्रथमानिर्दिष्टं समास उपसर्जनम्" इत्यतः 'समासे', 'उपसर्जनं' चेति पदद्वयम् अनुवर्तते। अतः "प्रथमानिर्दिष्टं समास उपसर्जनम्" इति सूत्रं न स्याच्चेत् तादृशी व्यवस्था न स्यात् । अत्रेदमुच्यते तर्हि "एकविभक्ति समासे चापूर्वनिपाते उपसर्जनम्" इत्येवं सूत्रमस्तु । तेन तस्यैव एकस्य उपसर्जनसंज्ञा स्यात्। "गोस्त्रियोरुपसर्जनस्य" इति तस्य फलमस्तु इति सुधीभिः भाव्यम्। अत्र साम्प्रदायिकैः वक्तुं शक्यते स्वतन्त्रेच्छस्य मुनेः अपर्य्यनुयोज्यत्वात् नैषा शङ्का समुचिता। वस्तुतस्तु न केवलं पूर्वनिपातः, "अनुपसर्जनात्" (४/१/१४) इत्यपि उपसर्जनसंज्ञाफलम् अन्वेषणीयम् इति शम्।

**पादटीका**

१. अष्टाध्यायी (१/२/४३)

२. सारदारञ्जनविद्याविनोदविरचिते मितभाषिणीव्याख्यायाम्।

३. अष्टाध्यायी (२/१/३७)

४. तत्रैव (२/१/६)

५. तत्रैव (२/२/३०)

६. तत्रैव "(२/२/३१)

७. तत्रैव "(१/२/४४)

**८.** श्रीहरिनामामृतव्याकरणम्, समासप्रकरणम्, सूत्रसंख्या – ६, पृष्ठाङ्कः – २३५

**९.** सुपद्मव्याकरणम्, सूत्रसंख्या – ४/३/५९

**१०.** सुपद्मव्याकरणम्, सूत्रसंख्या - ०४/०३/०४

**११.** आशुबोधव्याकरणम्, सूत्रसंख्या – १०१८

**१२.** आशुबोधव्याकरणम्, सूत्रसंख्या – १०१९

१३. सारस्वतव्याकरणम्, समासप्रक्रिया, पृष्ठाङ्कः -२१२

१४. सारस्वतव्याकरणम्, समासप्रक्रिया, पृष्ठाङ्कः -२१४

**सहायकग्रन्थाः**


१. अष्टाध्यायी, पुष्पादीक्षितः, संस्कृतभारतीद्वारा २०१० वर्षे।

२. आशुबोधव्याकरणम्, श्रीतारानाथतर्कवाचस्पतिभट्टाचार्यः, सरस्वतीयन्त्रद्वारा १८९२ वर्षे।

३. वैयाकरणसिद्धान्तकौमुदी, गिरिधरशर्मा, मोतीलालवेनारसीदासद्वारा २००१ वर्षे।

४. वैयाकरणसिद्धान्तकौमुदी, सच्चिदानन्दमुखोपाध्यायः, साहित्यनिकेतनद्वारा २०१०-२०११ वर्षे।

५. श्रीहरिनामामृतव्याकरणम्, श्रीजीवगोस्वामी,माधवभवनद्वारा २०१४ वर्षे।

६. सारस्वतव्याकरणम्, दामोदराचार्यः, १८१३ शकाब्दे।

७. सुपद्मव्याकरणम्, १९३७ वर्षे।

८. BHATTOJI DIKSHITA'S SIDDHANTA KAUMUDI, KUMUDRANJAN RAY, BY SARADARANJAN RAY, 1967

# हिन्दूत्तराधिकारविधिः

डॉ. वसन्तरायमहापात्र

१९५६ खीष्टाब्दे जूनमासस्य सप्तदशदिनाङ्के विधिरयं लोकसभायां राष्ट्रपतिनाऽनुमोदितः। जम्मूकाश्मीरप्रदेशं विहाय सर्वत्र भारतवर्षे विद्यमानानां हिन्दूनां कृते विधिरयं समुद्दिष्टो भवति। अनेनैव विधिना स्वत्वं वंशानुक्रमिकमिति निरूपितम्। तदनुसारेण च विधेरस्य नामकरणं हिन्दूत्तराधिकारिविधिरिति सञ्जातम्।

तत्र हिन्दुशब्देन के बोध्यन्ते इति निरूपणार्थं विक्षुद्धहिन्दुसध्मदायस्य सह ये खलु विक्षुद्धहिन्दुसम्प्रदायस्य ये च बौद्ध-जैन-शिखधर्मावलम्बिनश्च भवन्ति ते सर्वे हिन्दव इति समुद्घोषितम्। पुनश्च येऽन्ये जनाः मुसलमान्-ख्रीष्ट-पार्शिप्रभृतयो न भवन्तीति परम्परया प्रमाणितं भवति, तेऽपि हिन्दुविधिद्वारा परिचालिता भविष्यन्ति। अपि च ये जनाः धर्मान्तरं परित्यज्य गृहीतहिन्दुधर्मा भवन्ति तेऽपि हिन्दव इति कथयिष्यन्ते। वस्तुतः ये हिन्दुशास्त्रानुमोदितदेवदेवीनां पूजार्च्चनां परम्परया कुर्वाणाः सन्ति, ते सर्वे हिन्दव इत्यत्र नास्ति संशयः। सर्वेषां धर्माणां हिन्दुधर्मः पुरातन इति कृत्वा धर्मोऽयं सनातनधर्मनाम्ना प्रथितो भवति। तेषां हिन्दुनामुत्तराधिकारविषये चर्च्चात्र भविष्यति।

अनादौ संसारे न हि सर्वे जनाः एकत्रैवावस्थातुमर्हन्ति। यद्यपि संयुक्त परिवारो बहुशोऽत्र दृश्यते प्रशंस्यते च तथापि पृथगवस्थानेन धर्मो वर्धते। प्रसङ्गेऽस्मिन्नुक्तं मनुना-[१]

एव सह वसयुवा पृथग्वा धर्मकाम्यया।
पृथग् विवर्धते धर्मः तस्माद्धर्म्या पृथक् क्रिया।।

अत्र पृथग्वासशब्देन विभागो बोध्यते। यदि स्वेच्छया कश्चिद् स्वपत्नीपुत्रादीन् नीत्वा विदेशे तिष्ठति, स भ्रातृभ्यः पृथगभवदिति

नोच्यते। परन्तु यावत्पर्यन्तं तस्य पितृपितामहादिधनं परस्परं भ्रातृभिःसह विभज्य न गृह्यते तावत्पर्यन्तमसौ न भिन्नः। अत एव यदा पूर्वपुरुषाणां पितृपितामहादीनां धने उक्तपुरुषाः पुत्रपौत्रादयोऽधिकारिणो भवन्ति तदा तत्र विभागशब्दः प्रयुज्यते। अर्थात् पूर्वेषां धने (पैतृके)येऽधिकारिणस्ते उत्तराधिकारिण इति कथ्यन्ते। विभागादेव तेषामधिकार आपद्यते। तत्र विभागस्य किं तावत् स्वरूपमिति जिज्ञासायां नारदेनोक्तं यत्-[२]

विभागोऽर्थस्य पित्र्यस्य पुत्रैर्यत्र प्रकल्प्यते।
दायभाग इति प्रोक्तं तद्विभागपदं बुधैः।।

एतेन पित्रादिधनानां पुत्रादिभिर्यो विभागः स एव दायभागपदेन बोध्यते। प्राचीनकाले दायभागस्य मुख्यतो द्वेधा धाराऽऽसीत्। तत्र विज्ञानेश्वरादिभिरत्र जातत्वादिना पुत्रादीनां पित्रादिधनेऽधिकारो दर्शितः। जीमूतवाहनेन तदनुसारिभिः पिण्डदानाद्युपकारादिना पित्रादिधने पुत्रादीनामधिकारः प्रतिपादितः। जीमूतवाहनस्य दायभागः केवलं पूर्वराष्ट्रे, मिताक्षरा च तदतिरिक्तं सर्वत्र भारतवर्षे प्रचलति स्म। द्वयोर्मतयोर्बहुषु स्थलेषु विचारगतो व्यवस्थागतश्च भेदो दृश्यते स्म। यद्भवतु तत्तदनुगामिभिः तत्तद्देशे परम्परया सा सा व्यव्यस्था स्वीकृताऽऽसीत्।

पैतृकधनं दाय इति पदेनोच्यते। तं दायं ये गृह्णन्ति ते खलु दायादा इति। दायादा एवोत्तराधिकारिणः। पैतृकधने पुत्रादीनां योऽयमधिकारः स य स्वत्वहेतोरिति निश्चीयते। यतो हि स्वत्वं विना न हि कश्चन पूर्वेषां धने उत्तराधिकारी भवितुमर्हति। तस्मात् किं नाम स्वत्वं तद् विचारणीयम्।

स्वत्व नाम यथेष्टविनियोगार्हत्वम्। अर्थात् यद्धनं यथेष्टभावेन विनियोक्तुं शक्यते तस्मिन् धने स्वत्वमस्तीति कथ्यते नान्यथा। स्वत्वे पञ्च निमितानि गौतमेन प्रतिपादितानि[३] यथा – स्वामी–रिक्थ–क्रय–

संविभाग–परिग्रहाधिगमेषु। ब्राह्मणस्याधिकं लब्धं क्षत्रियस्य विचितं निर्विष्टं वैश्यशूद्रयोरिति। तत्र रिक्थं नाम अप्रतिबन्धो दायः, समुचित–मूल्यदानेन द्रव्यस्वीकारः क्रयः इत्युच्यते। सप्रतिबन्धदायस्य विभागः संविभागः, परिग्रहो नाम अनन्य–साधारणस्यारण्यादेः तृणकाष्ठादेर्वा ममेदं बुद्ध्या ऐदं प्राथम्येन स्वीकारः इति कथ्यते। अधिगमो मार्गात् निध्यादेः प्राप्तिः। एते पञ्च हेतवः सर्ववर्णसाधारणाः। किन्तु प्रतिग्रहलब्धे धने ब्राह्मणस्याधिकाधिकारः, क्षत्रियस्य युद्धार्जिते धने, वैश्यस्य कृषिपशुपालनवाणिज्यादिना लब्धे धने, शूद्रस्य चेतरवर्णानां सेवालब्धे धने स्वत्वमधिकतया तिष्ठति। तच्च स्वत्वं जन्मनेति मिताक्षरायां विज्ञानेश्वरादयः, स्वाम्युपरमात् स्वमिति दायभागे जीमूतवाहनादयः स्वीकुर्वन्ति। पुनश्च, स्वत्वं लौकिकं शास्त्रैकसमधिगम्यं वेति विचिकित्सायां स्वत्वं लौकिकमिति मिताक्षरायां विज्ञानेश्वरादयः, शास्त्रैकसमधिगम्यमिति दायभागं जीमूतवाहनादयः प्रतिपादयन्ति। एवं प्रकारेण द्वयोः सम्प्रदाययोर्मध्ये मतभेदो दृश्यते।[४]

अत्रास्माभिरेवं समाधातुं शक्यते यत् पैतृके धने पुत्राणां यद् जन्मना स्वत्वं मिताक्षराकारेणोक्तं तत् सामान्यस्वत्वं, जीमूतवाहनेन दायभागे यत् सम्यगुपरमात् स्वत्वमित्युक्तं तत् विशेषस्वत्वमिति यद्युच्येत, तर्हि न कोऽपि विरोधः। अर्थात् प्रतृके धने पुत्राणां सामान्ये स्वत्वे विद्यमाने सति विभागद्वारा तत्र विशेषस्वत्वमापाद्यत इति न कापि विप्रतिपत्तिः।

परन्तु केवलं जन्मना स्वत्वे सिद्धेऽपि पुत्रादीनां पित्रधीनत्वात् स्वातन्त्र्येण पैतृकधनस्य यथेष्टविनियोगार्हता नास्ति। पितुस्तु पुत्रादीनां स्वत्वे सत्यपि स्वातन्त्र्यादावश्यकीयधर्मकृत्येषु कुटुम्बभरणादिषु नैत्यकाग्निहोत्राष्टकादिष्ववश्यकर्त्तव्येषु तद्भङ्गे प्रत्यवायापत्तेः, तत्तत्कर्मसिद्ध्यर्थमस्त्येवाधिकारो धनव्यये। यद्यसौ किमप्यन्यायेन विक्रीणीते ददाति वा, तदानीं जन्मना स्वत्वात् तं निरोद्धमपि पुत्रः

प्रभवेत्। अतस्तत्र पुत्राणां भोजनपरिधानाद्यावश्यकीय-कर्त्तव्येष्वधिकारात्सामान्यं स्वत्वं विद्यते। विभागादनन्तरं यदा ते प्रत्येकं स्व-स्व-धनं गृहीत्वा पृथक् पृथक् तिष्ठेयुस्तदा तेषां तद्धने विशेषस्वत्वमस्तीत्युच्यते।

आधुनिकहिन्दूत्तराधिकारिविधौ तु तदेव सामान्यस्वत्वमुत्तरजीविस्वत्वमिति ....... कथ्यते। तादृशे स्वत्वे सति पुत्रः पैतृकधनं केवलं भोक्तुं प्रभवति न दातुं विक्रेतुं वा। परन्तु पितुर्मरणानन्तरं पुत्राणां पैतृके धने यद् विशेषस्वत्वमायाति **तदर्चुंत्तराधिकारिस्वत्वमिति** ........ कथ्यते।

अविभक्तहिन्दुपरिवारे एकस्य मरणानन्तरं तस्य धनं तत्परिवारस्याऽन्येषां सदस्यानां यद्भवति तदुत्तरजीविसूत्रेण सम्पत्तेर्विवर्त्तनम् .....इत्युच्यते। अर्थात् परिवारस्यान्येषां सदस्यभूतानां दायादानामुत्तरजीवनहेतोः (तदानीं जीवितत्वात्) मृतस्य स्वत्वं तान् प्रत्यायाति। तेषाञ्च तदानीं तत्र स्वत्वोत्पत्तेः तदुत्तरजीविस्वत्वम् ..... इति। एकस्य मरणात् तेन सह तन्मृतस्य जन्यजनकभावसम्बन्धात् तद्धने योऽधिकारः स उत्तराधिकारी स्वत्वादेव सम्भवति। अर्थात् पितुर्मरणादनन्तरं तत्पौत्रादयः मिलित्वा तद्धनं समं विभज्य गृह्णन्ति, मृतमुद्दिश्य च पिण्डोदकदानं कुर्वन्ति। पित्रादीनां पिण्डदानकारणात्पुत्रादीनां तद्धने उत्तराधिकारिता। पितुश्च पिण्डदानं करिष्यमाणः पुत्रो वेतनरूपेण पैतृकं धनं लभत इति स्पष्टतया ज्ञायते। अतःतदकुर्वतः कुतस्तस्य वेतनम्। एतेन ज्ञायते यत् संयुक्तपरिवारे (एकान्नपरिवारे) एकस्य मरणे तद्धनमुत्तरजीविस्वत्वहेतोरन्येषां परिवार-सदस्यानां भवति। तदनन्तर यदि कश्चित् कस्यचिद्धनं प्राप्स्यति तदुत्तराधिकारिस्वत्वहेतोर्न अपितूत्तरजीविस्वत्वहेतोरिति। अत एवोत्तरजीविस्वत्वं केवलमविभक्तपरिवारस्य साधारणधनविभागस्य कृते

प्रयुज्यते, न तु स्वार्जितस्याऽसाधारणधनस्य कृते। असाधरणसम्पत्तेर्विभागार्थमुत्तरजीविस्वत्वं न विचारकोटिमायाति; अपि तूत्तराधिकारिस्वत्वमिति विशेषः। अर्थादविभक्तहिन्दुसम्पत्तावविभक्त-साधारणसम्पत्त्यतिरिक्तसम्पत्तौ चोत्तराधिकारिस्वत्वमस्तीति। तत्र मिताक्षराकारेण विज्ञानेश्वरेणोभयमुत्तरजीविस्वत्वमुत्तराधिकारिस्वत्वञ्च स्वीक्रियेते। परन्तु दायभागे जीमूतवाहनेन केवलमुत्तराधिकारिस्वत्वमिति विशेषः।

परिवारशब्दः कुटुम्बिनां समेषां सहावस्थानं बोधयति। यद्यपि सहावस्थानं प्रीतिप्रदं हिन्दुपरिवारे चादर्शभूतं तथापि विभागस्यानिवार्यता लोके उपलब्धा। मनुनारदादिस्मृतिकारैः एकत्रवासापेक्षया पृथग्वासस्य प्रशंसाऽपि 'पृथग्विवर्द्धते धर्मः तस्माद्धर्म्या पृथक् क्रियेति' वचनत्कृता। अतः भ्रातरः परस्परं पृथग्भूता दृश्यन्ते। पुत्रः पितुः मातुश्च सकाशादपि भिन्नो भूत्वा तिष्ठति। केचन भिन्ना भूत्वापि पुनरेकत्र वासं कर्त्तुं वाञ्छन्ति कुर्वन्ति च। ते संसृष्टा इत्युच्यन्ते। यद्भवतु यदा भ्रातृषु एकोऽपि पृथग्वासं वाञ्छति तदा विभागः करणीयः एव। समेषामिच्छया सहवासः किन्तु एकस्यापीच्छया पृथग्वासो भवति। पृथग्वासे पैतृकस्य धनस्य विभजनं पुत्रादिभिः क्रियते। क्रमागतं साधारणीभूतं स्थावरमस्थावरं वा पैतृकं धनं वभागयोग्यं भवति; न तु स्वोपार्जितं धनम्। विभागात् प्राक् पैतृकमृणादिकं परिशोधनीयम्। यदि गृहे कश्चिद् विकलाङ्गः, असमर्थ उपार्जनाक्षमो वा स्यात्, तर्हि तस्य कृते भरणपोषणार्थं द्रव्यं साधारणधनात् दत्त्वाऽवशिष्टं विभजेत्। विभागकाले यदि कश्चिदप्राप्तवयस्कः स्यात् तर्हि तस्य कृते धनं कस्यचिदभिभावकस्य सविधे व्ययरहितं सत् स्थापनीयम्। विभागकाले यदि अविवाहिताः कन्यकाः सन्ति, तर्हि तासां विवाहार्थं भरणपोषणार्थञ्च धनं पर्य्याप्तं संस्थाप्याऽवशिष्टं विभजेत्। विभागे सर्वे

भ्रातरः समभाजः। अत्र ज्येष्ठांशकल्पना नास्ति। सम्बन्धिनः सर्वे दायमर्हन्ति। एकमन्यं स्वभागान्न वञ्चयितुं प्रभवेत्।

यदा साधारणीभूतस्य धनस्य विभजनं क्रियते तदा पितापुत्रयोर्मध्ये समभागः एव कल्प्यते। यदि पितुः त्रयः पुत्राः तर्हि समग्रं धनं चतुर्द्धा विभज्य प्रत्येकमेकैकमंशं गृह्णीयात्। भ्रातृभिः विभागे क्रियमाणे ज्येष्ठताविचारं न कृत्वा सर्वे समभागं गृह्णीयुः। मातृधने पुत्राः सर्वे समांशभाजः। विभागात्प्राग् धनिनो मरणे तद्धनं तस्य पुत्रः, तदभावे पौत्रः, तदभावे च प्रपौत्रो गृहणीयात्। न तु प्रपौत्रस्य पुत्रः, तस्य पुरुषत्रयानन्तर्भावात्। यदि जीवति पितरि पैतृकधनस्य विभागो भवति, तर्हि पिताऽपि पुत्रतुल्यांशं गृहणीयात्। पितुर्मरणानन्तरं कन्यापि पुत्रतुल्यांशं धनं गृह्णाति। जीवति पितरि कन्यानां पितृधने स्वत्वाभावात्।

पादटीका :

१. मनु– ९ – ११

२. दा.भा.पृ – १

३. गौ.ध.सू– २–१–३

४. या.व्य.अ.पृ–२६५

सहायकग्रन्थाः

१. मनुस्मृतिः

२. याज्ञवल्क्यस्मृतिः

# कालिदासभवभूत्योः दृश्यकाव्येषु प्रतिफलिता प्रेमभावना

ड. पार्थसारथिमूखोपाध्यायः

सारसंक्षेपः – संस्कृत साहित्ये कालिदासो भवभूतिश्च उज्ज्वलज्योतिष्करूपेण प्रतिभातौ। कालिदासभवभूतिभ्यां विरचितानि दृश्यकाव्यानि खलु स्व-स्वगौरवेण स्वातन्त्र्येण च प्रतिभान्ति। कविमुख्याभ्यां विरचितेषु दृश्यकाव्येषु यादृशी प्रेमभावना प्रतिफलिता तस्याः यथायथपर्यालोचनेन एकं तुलनात्मकमालोचनं क्रियतेऽस्माभिः।

भूमिका – संस्कृतसाहित्ये महाकविः कालिदासो हि भारतवर्षस्य जातीयः कविः। कविकुल ज्योतिष्केषु कालिदासो रवीयते। सत्यपि वैमत्ये भारतेतिहासस्य सुवर्णसमयतया प्रथिते गुप्तसाम्राज्यकाले कवेः कालिदासस्य प्रादुर्भावः सम्भाव्यतेऽस्माभिः। कविना कालिदासेन मालविकाग्निमित्र – विक्रमोर्वशीयाभिज्ञानशकुन्तलाख्यानि त्रीणि दृश्यकाव्यानि विरचितानि। सर्वस्वेव कालिदासकृतिषु विलसति सुषमा। भवभूतिकृतं दृश्यकाव्यत्रयं यथा – महावीरचरितं मालतीमाधवम्, उत्तर रामचरितञ्चेति। दृश्यकाव्यरचनायां कविमुख्ययोः स्वातन्त्र्यं परिलक्ष्यते। दृश्यकाव्यरचनायां वेद-रामायण-महाभारत-पुराणदिभ्यः कथावस्तुभागो यद्यपि गृहीतः कविमुख्याभ्यां तथापि सर्वकाव्येषु स्वतन्त्रता विराजते। स्वातन्त्र्यवशात् कविद्वयरचितानि दृश्यकाव्यानि स्वकीयवैशिष्ट्येन उज्ज्वलानि। दृश्यकाव्यरचनायां कविद्वयस्य अस्ति बहुधा साम्यं, बहुधा च वैषम्यम्। वस्तुविन्यासे, निसर्गचित्रणे, मानवचरित्रचित्रणे, प्रेम निरूपणे कविद्वयस्य पटुत्वं परिलक्ष्यते। वाल्मीकितः कालिदासः, कालिदासतो भवभूतिः भवभूतेश्च उत्तकालीनाः कवयः – इत्यस्यां

परम्परायां कालिदासभवभूतिभ्यां विशिष्टं स्थानम् अधिक्रियते। कविद्वयविरचितानां दृश्यकाव्यानां यथायथपर्यालोचनेन तेषु दृश्यकाव्येषु प्रतिफलितां प्रेमभावनामुपजीव्य कविद्वयस्य यत् साम्यं वैषम्यं वा परिलक्ष्यते तत् खलु अस्य निबन्धस्य आलोच्यविषयतया उपात्तमस्माभिः।

संस्कृत काव्यपरम्परायां महाकविकालिदासो भवभूतिश्च लब्ध प्रतिष्ठेषु कविषु अन्यतमौ वर्तेते। एताभ्यां कविमुख्याभ्यां विरचितेषु काव्येषु अनेकानि काव्यगतवैशिष्ट्यानि परिलक्ष्यन्ते।

संस्कृतवाङ्मये कालिदासो भवभूतिश्चेति नामद्वयं सुधियां सुविदितं वर्तते। तत्रानुमानिके अयम् अवगमो यत् ख्रीष्टीये चतुर्थे शतके कालिदासस्य, अष्टमे च भवभूतेराविर्भावोऽभवत्। नास्ति कविरचौरः इत्यस्ति प्रसिद्धिः। अतएव स्वाभाविकम् एतद् यद् आदिकविप्रणीतां रामायणकथाम् उपजीव्य यथा कालिदासेन तथा भवभूतिनापि प्रणीतं काव्यम् अल्पम्। रघुवंशमहाकाव्यस्य प्रथमसर्गस्थे चतुर्थलोके प्राक्तनान् कविजनान् प्रति कालिदास बद्धः प्रणामञ्जलिः वाल्मीकिम् एव प्राधान्येन विषयी करोति –

अथवा कृतवाग्द्वारे वंशेस्मिन् पूर्वसूरिभिः।
मणौ वज्रसमुत्कीर्णे सूत्रस्येवास्ति मे गतिः।। (रघु, १४)

कालिदासोत्तरसूरिर्भवभूतिरपि उत्तररामचरितनाम्नो रूपकस्य नान्दीश्लोक पूर्वतनान् कवीन् एव उद्दिश्य स्तुतिं रचयति, न कमपि देवं द्विजं, राजनं वा उद्दिश्य –

"इदं कविभ्यः पूर्वेभ्यो नमोवाक्यं प्रशास्महे।
वन्देमहि च तां वाचममृतामात्मनः कलाम्।।" (उत्तररामचरित–१)

कविद्वयेन प्रदर्शितं मार्गमेतत् भूयांसोऽन्येऽपि कवयोऽनुसरन्ति इत्यत्र सन्ति बहूनि निदर्शनानि। एतद्दृष्ट्या निरूपणीयमस्माभिः यत्

कालिदासस्य कियान् प्रभावो भवभूतेरुपरि विस्तृतिम् अलभत, कियद्दूरं वा प्रसृतं द्वितीयस्य कवेः स्वातन्त्र्यम्।

"अपारे काव्यसंसारे कविरेकः प्रजापतिः।
यथास्मै रोचते विश्वं तथेदं परिवर्तते।।"

अलंकारशास्त्रेषु प्रसिद्धिं प्राप्तः श्लोकोऽयं कविप्रजापतेः स्वातन्त्र्यं तत्कृतेश्च नियतिकृतनियमरहितत्वम् अस्मान् स्मारयति। अत एव कवयः श्रेष्ठताम् उपयान्ति, प्राक्तनान् कविजनान् प्रति ऋणम् अनुभवन्तोऽपि ते स्वकीयतां न विसृजान्ति। एतत् सर्वं मनसि निधाय अस्माभिः कविद्वयस्य साम्यं वैषम्यं पत्रस्य आलोच्यविषयतया उपात्तम्। कविद्वयस्य निवन्धकारेण स्वकीय-उत्तररामचरिताख्ये प्रबन्धे सुष्ठु समाकलितम्। कालिदासः सुन्दरसामग्री समाहरणपुरःसरम् उपमाच्छलेन काव्यसौन्दर्य संवर्धयति, अतो हि तत्कृतानि वर्णनानि समाधिकं माधुर्यपरिपूर्णानि भवन्ति, बीभत्सादिरसे तस्य साफल्यं नास्ति। भवभूतिस्तु न केवलं मधुरसामग्री संकलनं करोति; यत्किञ्चिद् वर्णनीयविषयस्य प्रधग्ग्राशतया प्रतिभाति, तदेव ललितकठोरनिर्विशेषं सुनिपुणं चित्रयति। वङ्किमचन्द्रवचनम् अनूद्य वक्तुं शक्यम् -

"मधुरे कालिदासः अद्वितीयः उत्कटे भवभूतिः" इति।

(उत्तरचरित विविध प्रबन्ध)

कविद्वयस्य अस्ति वहुधा साम्यं, बहुधा च वैषम्यम्। एकस्मिन् निबन्धे सर्वेषां साम्यस्थलानां वैषम्यस्थलानाञ्च पर्यालोचनं दुष्करमेव किञ्चित् कर्मेति कृत्वा विशेषतस्तयोः काव्येषु प्रदर्शितः प्रणयव्यापार एव वक्तव्यविषयीकृतः।

प्रेमो हि प्राणिनां आदिमा काचित् प्रवृत्तिः रूपैर्निकविधैः य आत्मानं प्रकाशयति। यथा मनुष्येषु तथा मनुष्येतरप्राणिष्वपि परिदृश्यमान अयम् आवेगः अतिव्यापक एव। परन्तु मानवानां समाजश्रितानां प्रणयः

प्रायशोबुद्धया नियमनम् अर्हति, न तथा समुपलभ्यते इतरप्राणिनां जगति। अतएव अस्माकं (निबन्धे) वक्तव्ये प्रणयशब्दो मुख्यतया मानवप्रेमाणम् एव परामृशति।

प्राच्या प्रतीच्याश्च कवयो व्यापकम् एतत् प्रणयं विषयीकृत्य स्व-स्वकाव्यानि सृष्टवन्तः इत्यत्र अनल्पानि प्रमाणानि सन्ति। परन्तु कविजनस्य प्रणयदर्शनं जीवदर्शनं व्यतिरिच्य नावतिष्ठते जीवनदर्शनमपि कविद्वयस्य नास्माभिरुपेक्षणीयम्। कालिदासभवभूती द्वावपि कवी गम्भीराशयौ एव। तथापि कालिदासो वास्तवमनुकुर्वाणो जीवनस्य लघुस्तथा गुरुश्चेति द्वावेव पक्षौ समाद्रियते, यद्यपि लघुपक्षस्य गुरुपक्षे समुत्तरणमेव तत्र कवेर्लक्ष्यभूतम्। यत् किञ्चित् प्रशान्तम् उदारं च तस्य कृते कवेरासीन्महती काचित् अभिरुचिः। तदिदं जीवनदर्शनं कालिदासस्य प्रेमभावनां प्रकृतिभावनां च संघटयति। भवभूतेस्तु केवरन्तरात्मा किञ्चिद् विक्षुब्ध इव प्रतिभाति। कालिदासापेक्षया स्पष्टतरवाक् सः अयम् उत्तरसूरिः नारीजनान् तथा चातुर्वर्ण्यमध्ये चतुर्थं वर्णं प्रति तत्कालीनम् अविचारम् असहमानः स्वस्य मनोगतं प्रायशो मुखर प्रतिवादेन प्रकटयति। कालिदासो हि परिमितवाक् व्यञ्जनामेव समाश्रयति। भवभूतिरपि नासीद् व्यञ्जनाविमुखः, तथापि कवेरस्य मनोदाता विक्षोभः तं क्वचित् तथा वाचालयति यथा व्यञ्जनाम् अपरिहाय अपि साक्षाद्वचनानि बलिष्ठानि स समुपस्थापयति। स्वपदवाच्यातया विमुक्तोऽपि भवभूतिः स्वपदानूद्यताम् अनेकेषु स्थलेषु प्रदर्शयति इति कविद्वयस्य विद्यन्ते स्वस्वाभिमतानि जीवनदर्शनगतानि शैलीगतानि च असाधारणानि वैशिष्टानि। यत् किञ्चित् तयोः काव्यानां रूपं प्रथमं तत् प्रतिपाद्य साधारणं रूपम् अस्माभिरुन्मोचनीयम्।

दृश्यते एतद् यद् भवभूतेः प्रेमभावना केषुचिद् अनेकेषु स्थानेषु कालिदासस्य प्रभावं प्रमाणयति। द्वाभ्यामेव कविभ्यां अपत्यद्वारेण प्रेम्णः

पूर्णताप्राप्तिः प्रत्यायिता। विशेषतः, कालिदासस्य अभिज्ञानशाकुन्तले, विक्रमोर्वशीये, रघुवंशे तथा कुमारसम्भवे च अस्य प्रेमस्वभावस्य परिस्फुरणम् आयाति अस्माकम् अनुभवपथम्। भवभूतिरपि यस्मिन् विशिष्यते तस्मिन् नाटके उत्तररामचरिते एतदेव प्रेमदर्शनं दाम्पत्यस्य परिणमनं च अस्मत्समक्षम् उपस्थापयति। प्रेमावलम्वी यः शृङ्गाररसस्तस्य द्वे गती–सम्भोगः विप्रलम्भश्चेति। तत्र सम्भोगोपि विप्रलम्भद्वारेणैव उत्कर्षमावहति। अतः एतयोः रूपयोर्मध्ये विप्रलम्भ एव महनीयतरं कामपि पदवीम् आसेवते इति न केवलम् आलङ्कारिकैः, कविभिरपि समादिष्टम्। अस्मिन्नवसरे अतिप्रसिद्धः कः अपि श्लोकः सदुक्तिकर्णामृते श्रीधरदासेन धर्मकीर्तिकवेः कृतित्वेन समुद्धृतः, दर्पणकारेण च (भ्रान्तिमान) भ्रान्तिमदलङ्कारनिरूपणावसरे समुपन्यस्तोऽस्माभिः अनुसन्धेयः। तथाहि –

''सङ्गमविरहविकल्पे वरमिह न सङ्गमस्तस्याः।
सङ्गे सैव तथैका त्रिभुवनमपि तन्मयं विरहे।।''

अतएव नैतच्चित्रं यन् महाप्रतिभासम्पन्नाः कवयो विप्रलम्भे एव सम्भोगापेक्षया भारम् आदधति। विप्रलम्भ एव महाकविभ्यो रोचतेतराम्। तदपेक्षया न केवलं सम्भोगस्य पूर्वरागस्यापि अकिञ्चित्करत्वमेव। कालिदासकृतिषु मालविकाग्निमित्रं व्यतिरिच्य अन्यत्र सर्वत्रैव विप्रलम्भस्य सुमहत् स्थानं कविना संदर्शितम्। यथा विक्रमोर्वशीये शकुन्तले वा तथा रघुवंशे मेधदूते च कविना विप्रलम्भस्य प्रगाढत्वं च सहृदयमानसम् उद्दिश्य प्रापितम्। भवभूतेश्च त्रिषु रूपकेषु वीररसप्रधानं महावीरचरितं वर्जयित्वा अन्यत्र मालतीमाधवे उत्तररामचरिते च विप्रलम्भस्य प्रसरः सामाजिकानाम् अभ्यर्चनाम् अर्हति। पूर्वसूरिणा सूचितम् इदं विप्रलम्भप्राधान्यम् उत्तसूरिकाव्ये गम्भीरतरं रूपं विभर्तीति धन्येयं कविपरम्परा। स्नेहैकसारः प्रणयो

मुख्यतया दाम्पत्यम् एव विषयीकुर्वन भवभूतेरुत्तररामचरिते परां काष्ठाम् उपगतो, यद्यपि तस्य प्रथमप्रकाशो मालतीमाधवे महावीरचरिते चापि न सुदुर्लभः। उत्तररामचरिते प्रणयस्य स्नेहसारत्वम् इतरप्राणिजगत्यापि यथा व्याप्नोति तथा दर्शयितुं कविना व्वसितम्। अस्य नाटकस्य तृतीयाङ्के हस्तिना सह हस्तिन्याः प्रणयलीलायां स्नेहस्याभिव्यक्तिरस्माकम् अपि मानसं कोमलयति, किमुत रामस्य सीतायाश्च। स्मरामो वयं तच्चित्रदर्शनं यत्र रामभद्रेणापि दक्षिणारण्य प्रवेशकाले सीतायाः सन्ताप त्राणाय तालवृन्तातपत्रं धृतम्। एवं यथार्थप्रेम्नि स्नेहस्याधिक्यम् इदं यथा मानवेषु तथा तिर्यक्प्राणिष्वापि आविष्कर्तुं शक्यम्। एतदपि वैशिष्ट्यं कालिदासकाव्येभ्यो भवभूतिकाव्येषु समायातमिति मन्यामहे वयम्। रघुवंशस्य त्रयोदशसर्गे पम्पासारोविजडिताम् आत्मनः प्राक्तनीम् अवस्थां सीतायै समुपवर्णयन् राघवस्तत्र सरोवरे स्थाङ्गनाम्नां पक्षिणां स्नेहनिर्भरं प्रणयमित्थं स्मरति --

"अत्राावियुक्तानि स्थाङ्गनान्मामन्योन्यदत्तोत्पलकेसराणि।
द्वन्द्वानि दूरान्तवर्तिना ते मया प्रिये। सस्पृहमीक्षितानि।"

तत्र स्थाङ्गपक्षियुगलं परस्परं भक्ष्यभूतम् उत्पलरेणुं ददातीति आचरणं स्नेहस्यैव प्रावल्यं निर्दिशति। अतो हि सुसङ्गतमेतद् यन्मानवसंसारेपि यक्षो यक्षवधूं प्रति, रामः सीतां प्रति, दिलीपश्च सुदक्षिणां प्रति तादृशमेव स्नेहम् अनुभवन्ति।

(२)

अन्योन्यवहुमानोपि प्रणबस्य दाढ्यम् आवहति। दाम्पत्यस्य बहुमानबहुलमेतत् चारित्रम् उत्तररामचरिते भवभूतिना सम्यक् प्रकाशं नीतम्। अस्यापि वीजं कालिदासकृतेः समाहृतमिति प्रतीयते। मालविकाग्निमित्रे महिर्षी धरिर्षीं प्रति नायकस्य अग्निमित्रस्य दाम्पत्योचिते आचरणे, तथा च विक्रमोर्वशीये आउर्वशीं प्रति पुरुरवसो

दाम्पत्यव्यवहारे देहजवासनायाः स्थानं प्रायेण नैवास्ति, अत्र बहुमान एव प्रेमभूमिं विरचयति।

परिपार्श्वम् उपेक्षमाण अधीरः प्रणयः कर्तव्यच्युतिदोषेण दुष्टः सन् दुःखाय भवतीति कालिदासेन अनेकेषु काव्येषु मेघदूतादिषु प्रतिपादितम्। परन्तु सर्वत्रैव कालिदासकाव्ये नैतदुपलभ्यते, कुमारसम्भवादीनि काव्यानि अत्र व्यतिक्रमतया तिष्ठन्ति। तत्र कर्तव्यच्युतेः प्रागेव नायकनायिकाः सावधाना भवन्ति तादृशी कापि विच्युतिर्माभूदिति। भवभूतिकृतेषु रूपकेषु विशेषत उत्तररामचरितेपि एतदेव परिदृश्यते। तत्र भार्यानुरागधर्मानुरागयोः विरोधेन पीड्यमानो राजा तथैव प्रयतते यथा स्वसुखस्यकृते राजकर्तव्यहानिर्न भवेदिति।

वाल्मीकिमनुसरन् कालिदासः प्रकृतिं प्रेमपरिपूरकतया समुपवर्णयति। अतो हि तेन प्रकृतेर्मःरम्याणि एव चित्राणि मुख्यतया परिवेशितानि। भवभूतेरुपरि अपि तत्प्रभावो विद्यते इत्यत्र सन्ति बहुनि प्रमाणानि। तथापि उत्तरसूरिणा तेन तन्मयानां वास्तवप्रकृतिचित्राणां कोमलकठोराणां च उपस्थापने अप्रथानुगं स्वातन्त्र्यं किमपि अवलम्बितम्। परन्तु वहिर्वस्तुचित्रणापेक्षया प्रायशः सर्वत्रान्तर्वस्तुचित्रणे एव कवेरस्य अभिरुचिर्भूयसी परिलक्ष्यते। प्रणयिजनानां मनोगता भावा आत्मविश्लेषणद्वारा प्रकाशमुपयान्ति। यद्यपि एतस्यापि सूचनं कालिदासकाव्येष्वपि कथञ्चिद् दर्शयितुं शक्यं तथापि भवभूतिरेव अस्मिन् विषये राजकीयमहिम्ना विराजते।

प्रेमभूमौ प्रकृतेरङ्गभावो मनोविश्लेषणं च आधुनिकेतरैः कविभिः प्राच्यैः प्रतीच्यैः, विशेषेण गीतिकाव्यकारैः सुनिपुणं प्रयतितम्। वर्षासु मेघराशिः प्रियायाः केशराशिम् अनुस्मारयति – ईदृशानि वर्णनानि कालिदासाद् भवभूतेश्च सूत्रकारेण समायातानि, अद्यापि सहृदयान् भूयोभूयः आनन्दयान्ति। महतः कवेः इदमिव महत्त्वं यत् तेनोपस्थापितं

जीवनदर्शनं प्रेमदर्शनं वा देशकालानवच्छिन्नं व्यापकत्वम् आधत्ते। एतत् हि सत्यं कालिदासकाव्यैर्भवभूतिकाव्यैश्च समधिकं प्रमाणितम्। एतयोः काव्यकारयोस्तुलानामुख्येन कस्योत्कर्षः, कस्य वा अपकर्षः (अपकर्ष) इति नास्माकं विचारविषयताम् अनुपतति। परन्तु तयोः साधर्म्यवैधर्म्यपरीक्षण मुखेनैव वयं स्थापयितुमिच्छामो यत् काव्यजगति न किमपि जायते आकस्मिकम्; अपि तु चिरं प्रवहमाना स्रोतस्विनीव वहति कापि कविपरम्परा यत्र एकः कविः स्वातन्त्र्यम् अनुत्सृजन्नपि अपरेभ्यः कविभ्यः सर्वथा पृथक्कृत्य आलोचयितुं न पार्यते। वाल्मीकितः कालिदासः, कालिदासतो भवभूतिः, भवभूतेश्च उत्तरकालीनाः कवयः - इत्यस्यां परम्परायां कालिदासेन भवभूतिना च विशिष्टं स्थानम् अधिक्रियते इत्यतस्तयोरेव काव्यविश्लेषणं वक्तव्यस्य विषयत्वेन परिगृहीतम्।

महाकविः कालिदासः पद्यनिबन्धने नाट्यलेखने च अप्रतिमां प्रतिभां धारयति इति हेतोः उभयविधेष्वपि काव्येषु सहजतया प्रेम्णः प्रसारः दर्शितः। तत्र किं नाम प्रेम इति प्रथमं विवेचनीयमस्ति। प्रेम वस्तुतो भावात्मकं कर्म इति। कमपि प्रति, कामपि प्रति, किमपि प्रति वा यस्य कस्यापि आसक्तिरूपं भावात्मकं कर्म विद्यते, तदेव प्रेमेति कथ्यते। तक्षा चोक्तं शारदातनयेन -

"परस्पराश्रयधनं निरूढं भावबन्धनम्।<br>
यदेकापायतोऽपयि तत्प्रेमेति निगद्यते।।"

इयम् आसक्तिः सर्वप्रकारान् कामान् जनयति। प्रेम एव स्नेहपर्यायम्। येन प्रकारेण तैलम् अन्यत् किमपि वस्तु आत्मनि श्लेषयतिनैव प्रकारेण स्नेहरूपं प्रेम पदार्थन्तरं श्लेषयति। इत्थं स्नेहपर्यायं प्रेम एकं बन्धनरूपम्। येन प्रकारेण रज्जुना कोपि वध्यते तेनैव प्रकारेण प्रेम्णा अपि कोऽपि प्रतिवद्धो भवति। अनेकप्रकारेषु बन्धनेषु मध्ये

स्नेहरूपं प्रेमरूपं वा बन्धनं लौहेभ्यः अपि कठिनतरं भवति।

कालिदासस्य काव्यानि सर्वाणि शृङ्गारपराणि विद्यन्ते। शृङ्गारपूर्णेषु काव्येषु रतिरूपो भावः स्थैर्यं दधाति। एतस्मादेव कारणात् शृङ्गारः प्रेमविवेचने अति महत्वपूर्णः। महाकविना भवभूतिना अपि काव्यानि लिखितानि। किन्तु मालतीमाधवे उत्तररामचरिते च रतिरूपं प्रेम भिन्नप्रकारं वर्तते।

संस्कृतसाहित्ये आचार्यैः लोकोत्तरचमत्कारदिशा रसः विस्तरेण प्रपञ्चितः। लोकोत्तरचमत्कार एव काव्यसर्वस्वम्। यतो हि लोकोत्तरवर्णनानिपुणकविकर्म एव काव्यं कथ्यते। लोकोत्तरवता व्यञ्जनायाः जायते। व्यङ्ग्यार्थचमत्कारत्वेन तथा व्यङ्ग्यार्थप्राधान्येन काव्यम् उत्तमकाव्यं ध्वनिकाव्यं वा भवति। काव्यात् सहृदयानां कृते केन प्रकारेण रसो व्यक्तो भवति इति "विभावानुभावव्यभिचारिसंयोगाद् रसनिष्पत्तिः" इति भरतसूत्रं व्याचक्षमाणानाम् आचार्याणां मतेषु स्पष्टीकृतं परिदृश्यते। रसः काव्यस्य आत्मारपः लोकोत्तर चमत्कारपूर्णः। रसं लब्ध्वा आनन्दीभवति लोकः।

(३)

जीवन दर्शनगतं किमपि साम्यमपि कविद्वयस्य सूचितमेव। जीवनदर्शने, प्रेमभावनायां प्रकृतिचित्रणे च कविद्वयस्य यथा साधर्म्यं तथा वैधर्म्यमपि भूयोभूयः प्रकाशते। द्वावपि कवी जीवने कामप्राधान्यं नाभिनन्दतः, दुःखपरिशुद्धे प्रेम्णि एव उभाभ्यां एव ताभ्यां भारम् आहितम्। उभावपि सन्तानलाभे पुत्रलाभे च साफल्यं परिपूर्तिं च आविष्कुरुतः। "रिक्तः सर्वो भवति हि लघु पूर्णता गौरवाय" इत्ययं भावो यथा कालिदासेन तथा उत्तरसूरिणा भवभूतिना एव समादृत आस्ते। प्रेमप्रकृत्योः अङ्गाङ्गिभावोऽपि कालिदासेन अवलम्वितो भवभूतिना अपि वन्दित एव। कालिदासकृतिषु यथा प्रकृतिर्मानवमनसः परिपूरकतया उन्मोचकतया च आभाति तथा भवभूतिकृतिषु अपि।

 ISSN 2320-2025

द्वावपि कवी भवितव्याततायां विश्वासं स्थापयतः। अयं हि विश्वासो भारतीय चित्तेषु सनातनः, पूवतनैरपि कविभिः भूयसा प्रख्यापितः। अत्र कालिदासो भवभूतिर्वा न कोऽपि व्यतिक्रमः। "अथवा भवितव्यानां द्वाराणि भवन्ति सर्वत्र" इति मन्यते कालिदासः, तन्मते "नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण।" एवं भवभूतेरपि विश्वासोयत् को नाम पाकाभिमुखस्य दैवस्त द्वाराणि पिधातुं शक्नोति इति।

"मालतीमाधवे अपि माधवमुखात् श्रुयते –
प्रायः शुभं च विदधात्यशुभं च जन्तो–।
सर्वङ्कषा भगवती भवितव्यतैव।।"

उपर्युक्तैः तथैः समर्थ्यते इदं उभावेव कवी सनातनीं भारतीय प्रथाम् अनुसरत इति।

न केवलं साम्यमेव, अपि तु वैषम्यमपि तयोः साहित्यकारयोः प्रभूतमासीत्। अन्यथा तयोः स्वातन्त्र्यं व्याहन्येत। अधुना अस्माभिः निरूप्यते केषु केषु विषयेषु कविद्वयस्य कीदृशो विशेषो विद्यते इति। कालिदासकाव्येषु कापि सामग्रिकता अस्माभिः अनूभूयते या हि लघुगुरुनिर्विशेषं वास्तवविषयान् परामृशति। अयं हि कविः नैकान्तेन लाघवपक्षपाती, न च ऐकान्तेन गौरवसेवी। सर्वेषु एव कालिदासकृतेषु रूपकेषु नायकस्य नर्मसचिवो विदूषको विकृताङ्गवचोवेषैः हास्यं जनयति, न तथा दृश्यते भवभूतेः कस्मिन्नपि रूपके। भवभूतिः जीवनस्य यथाकिञ्चित् गम्भीरं गभीरं च तत् सर्वं केवल समाद्रियते। कालिदासेन तदीयासु नाट्यकृतिषु वास्तवजीवने लाघवं सर्वथा नोपेक्षितम्।

कालिदासकाव्येषु देंवर्णनं देहजम् आकर्षणं वा सर्वथा नोपेक्षितम्। कालिदासकाव्यानि भवभूतिकाव्यापेक्षया प्रेम्णः सामग्रिकतरं रूपम् आवहन्तीति। उभावेव कवी मङ्गलपूजकौ। भवभूत्यपेक्षया कालिदासो

वास्तवानुगतर आसीदिति। अन्यत्रापि प्रेमभावनायां कविद्वयस्य अस्ति भेदः। भवभूतिकृतिषु नायिका यथा सर्वदा एकपतिका तथा नायकः अपि एकपत्नीक एव। वारं वारं रामः सीतां समाश्वासयति यत् तां प्रति आर्यपुत्रस्य प्रणयः न केवलं शाश्वतिकः, अपि च सर्वथा अविभक्त एव। कालिदासकाव्येषु च तदानीन्तस्य समाजशासितस्य प्रेम्णः छाया अस्ति एव। सर्वे नायकाः कालिदासरूपकेषु बहुपत्नीका एव सन्ति। भवभूतिकृतिषु दृश्यते एतद् यत् देवताभिरपि प्रेमाविषये मानवायितमेव। न च महावीरचरिते, न च उत्तररामचरिते कुत्रापि रामो देवमहिम्ना चकास्ति, सीता च देवमहिम्ना। मानवोचितम् एव तयोः प्रेम उत्तररामचरिते आदर्शपदवीं प्रापितः। परन्तु, कालिदासकृतिषु न सर्वत्र एतत् परिलभ्यते। मालविकाग्निमित्रे नायको नायिका च द्वावपि मानवौ एव। विक्रमोर्वशीये नायिका उर्वशी अप्सरसोद्भूता। शाकुन्तलेपि शकुन्तला अप्सरोनन्दिनी। तत्र तत्र उर्वश्यां शकुन्तलायां च न केवलं मानवोचितम् आचरणम्, अपि च अप्सरस्सुलभो व्यवहारः अपि क्वचित् संदृष्टः। कालिदासेन निपुणं ग्रथितं एतद् यथा शकुन्तला चरित्रे यथा अप्सरजनोचितस्य च वृत्तस्य स्फूरणं परिलक्ष्यते।

अङ्गिरसविषयोऽपि कवि द्वयस्य किञ्चद् वैषम्यं परिलक्ष्यते। कालिदासकृतिषु प्रायशः सर्वासुशृङ्गाररसस्य अङ्गित्वम् असंवादितमेव। केवलं रघुवंशे एव अस्य व्यत्ययो दृश्यते। भवभूतिकृतिषु तिसृषु अङ्गिरसगतं वैचित्र्यं न कथमपि अवज्ञातुं शक्यते। मालतीमाधवे अङ्गी शृङ्गारः, महावीरचरिते तु वीररसः। नाट्यशास्त्रोचितां सरणिम् उज्झित्वा भवभूतिः उत्तररामचरिते करुणरसम् एव अङ्गित्वेन उपात्तवान् इति महदस्य कवेः स्वातन्त्र्यम्। यथोक्तं तत्रैव तृतीयांङ्के --

"एको रसः करुण एव निमित्तभेदात्।" कालिदासकाव्येषु व्यञ्जना परां काष्ठां प्रापिता। रसध्वनिम् उपकुर्वाणाः उपमादय

अलङ्कारास्तत्काव्येषु सौन्दर्यातिशयं विभ्रति, अत्रैव तात्पर्यम्, उपमा कालिदासस्य इत्यादिशंसावचनम्। अतएव स्वल्पपरिसरेण वाक्यप्रयोगण स प्रायशो महान्तम् आशयं प्रकाशयति। भवभूतिकाव्येषु अपि व्यञ्जनायाः स्थानं प्रशंसनीयमेव। परन्तु तत्काव्येषु एतद् दृश्यते यद् व्यञ्जनया प्रकाशितमपि विषयं प्रायशः स कविवाक्यैरणुवदति एव। एतदपि यद् रसवाचकैः शब्दैः सोऽभिव्यक्तं रसं पुनः प्रकाशयतीति। एतद्धि वैशिष्ट्यं सपदानूद्यतेति अभिहितं भवभूतिकाव्येषु भूयसा प्राप्तं स्वपदवाच्यतादोषात् तत्काव्यानि संरक्षति। अयं हि प्राकट्यपक्षपातः भवभूतिकाव्येषु संदृष्टः कालिदासकाव्येषु अनुपस्थित एव।

कालिदासकाव्येषु संयमस्य परिमितिवोधस्य च परिचयोऽनुभूयते। भवभूतिस्तु न कालिदास इव काव्येषु संयमी परिमितिबोधसम्पन्नश्च। अतएव तत्कृतिषु भावोच्छ्वासस्य प्राबल्यं क्वचित् क्वचित् आस्वाद्यते यथा मालतीमाधवस्य नवमाङ्के। अतएव भवभूतिरचनासु प्रणयिजनस्य मूर्च्छक्रन्दनाकिदं प्राधान्येन प्रकाशते। न केवलं युवा माधवः, क्षत्रियमूर्धत्यः, रामः अपि प्रायेण मूर्च्छां प्रयाति, वाष्पं विसृजति, क्वचित् रोदिति। अनेन भावोच्छ्वासेन तस्य धीरोदत्तत्वं किञ्चिद् विपर्यस्यतीव। कालिदासकाव्येषु रघुवंशादिषु नायकरोदनं परिलक्ष्यते। तथापि तत्र संयमिनः कवेः नायकरोदनं परिलक्ष्यते। तथापि तत्र संयमिनः कवेः काव्येषु मूर्च्छ दीनाम् अनुचितं प्राधान्यं नास्माभिरनुभूयते। सम्यग् जानाति स कविः कुत्र तेन विरामः समीचीनः।

(४)

समाजभावनायामपि कालिदासभवभूत्योः साम्यमिव वैषम्यं चास्ति। रामायणकथामाश्रित्य कालिदासेन तथा भवभूतिना अपि काव्यविरचनं कृतम्। कविद्वयस्योपरि आदिकवेः प्रभावः अनस्वीकार्य एव। तथापि वाल्मीकिकाव्यापेक्षया कालिदासभवभूत्योः काव्ये

सीताचरित्रं अधिकतरं गुरुत्वं प्राप्नोति। रामायणस्य युद्धकाण्डे दीर्घविच्छेदकातरं मेलनाशोज्जीवितां मुग्धां सीतां प्रति रामस्य कटुभाषणमस्माकं खेदमावहति। कालिदासभवभूत्योः काव्ये नेदृशं कटूभाषणं स्त्रियमधिकृत्य कुत्रापि पदं लभते। कालिदासकाव्ये भवभूतिकाव्ये च पतिगतप्राणा अपि जानकी स्वात्मानं प्रति कृतम् अविचारं नाभिनन्दति।

न केवलं रामसीतयोः प्रणयम् अधिकृत्य, अपि च तदानीन्तन समाजसम्मतां वर्णबेभेदव्यवस्थाम् अपि अधिकृत्य भवभूतेः प्रतिवादः प्रसरति। नास्ति रघुवंशे शम्बुकवधस्य कोऽपि प्रतिवादः, नास्ति वा रामस्य कोऽपि द्वैधीभावः। भवभूतिस्तु प्रतिवादमुखरो यथा नारीं सीतां प्रति तथा शूद्रं शम्वकं प्रति एवंविधम् अविचारं वैषम्यनिर्भरं न क्षमते। उभयजैव राजधर्मो विरुणद्धि। मञ्चनिर्देशः अपि अत्रास्माकं अवधानविशेषम् अर्हति। कथाञ्जित् प्रहृत्य इति मञ्चनिर्देशो रामस्य द्विधाग्रस्तं मानसमुन्मोचयति। निधनादनन्तरं स राजा अनुतापदग्धः कथयति कृतं रामसदृशं कर्मेति। शम्बूकवधमुपजीव्य आविर्भूता रामस्यानुभूतिः सीतानिर्वासनं नान्याथाकर्तुं शक्नोति। तथापि इयम् अनुतापोपलब्धिः प्रजानां समाजस्य च चारित्रम् उद्धाटायन्ती भाविनं रामसीतासमागममार्गं सुगमीकरोति। अपि च रामायणे रघुवंशे च एतत् प्रदर्शितं यत् शूद्रजन्मनि कृतायाः तपस्यायाः किमपि सुफलं शम्वूकेन नासादितम्। उत्तररामचरिते तु राममुखाद् ज्ञायते यद् उग्रस्य तपसः परिपाको वैराजलोकस्याधिगमः शम्बूकेन शूद्रजन्मनापि प्रलब्धव्य इति।

उत्तररामचरिते रामकृतं शूद्रनिधनं न कयापि पुष्पवृष्ट्याभ्यर्चितम्। अपि तु अन्याय्यम् एवैतत् मानवधर्मदृष्ट्या इति भवभूतेः प्रतिपादनी मस्ति। सीतां शम्वूकं च विषयीकृत्य कवेः समवेदना तस्य समाजचेतनतां प्रतिवादवलिष्ठतां च प्रत्याययति। भवभूतेः विक्षुब्धो विद्रोही च अन्तरात्मा

सजीवप्रतिवादद्वारेण प्रकाशितः कालदिसस्य मार्दवप्रधानस्य प्रशान्तिप्रधानस्य च मनोभावस्य विपरीतां कामपि भावनाम् अभिव्यनक्ति। आदिकविं वाल्मीकिं पूर्वसूरिं कालिदासं च प्रति श्रद्दाधानोऽपि भवभूतिः स्वात्मनः स्वातन्त्र्यं जीवनदर्शने समाजदर्शने च इत्थं ख्यापयति।

एतदपि अस्माभिरवधेयं यद् रघुवंशमिव रामकथाश्रितम् अपि उत्तररामचरितं न वियोगान्तं, अपि मेलनान्तमेव। एतद्धि नायकनायिकयोः सम्मेलनं केवलं नाट्याशास्त्रानुगुण्येन प्रथानुगुण्येन च भवभूतिना कृतमिति सिद्धान्तो नास्मभ्यं रोचते। तत्कालीनं वैषम्यावलम्बिनं समाजं प्रति क्षोभ एव भवभूतिं वाचालयति येन मेलनान्तं परिणामं स विदधाति इत्यस्माकमभिप्रायः। कालिदासः खलु मृदुधर्मा कविः, भवभूतिस्तु तदपेक्षया उग्रधर्मा इत्यसमाकं प्रतिभाति।

**उपसंहार** - मानवदरदी कविः कालिदासः जीवनरहस्यं सम्यग् उद्धाटयितुं समर्थ आसीत्। भवभूतिस्तु परिणतप्रज्ञः कविरासीत्। उभावेव कवी सनातनीं भारतीय प्रथाम् अनुसरत इति। पनिवन्धेऽस्मिन् कालिदासगताया भवभूतिगतायाश्च प्रेमभावनायाः स्वातन्त्र्येण परीक्षणम् अस्माभिः कृतम्। जरवनदर्शने तथा प्रेमभावनायां कविद्वयस्य किञ्चिद् वैषम्यम् अनपलपनीयम्। कालिदासकृतिषु प्रायशः सर्वासु शृङ्गारस्य अङ्गित्वम् अविसंवादितम् एव। भवभूतिकृतिषु तिसृ, अङ्गीरसगतं वैचित्र्यं न कथमपि अवज्ञातुं शक्यते। उपक्रमे प्रस्ताविताां कविमुख्ययोः प्रेम भावनाम् उपजीव्य विभिन्नवैशिष्ट्यादिकं पर्यलोचितमस्माभिः। प्रेमप्रकृत्योनिविडं तदात्मीभवनम् आदिकविना सूचितं, कालिदासेन संवर्धितं भवभूतिकाव्येषु अपि यथा पदं लभते तथाऽस्माभिः प्रतिपादितम्। कालिदासः संयतवाक्, भवभूतिस्तु वलिष्ठवाक् इति इदमेव तयोर्बहुसाम्यसत्त्वे अपि मुख्यं वैधर्म्यं सिद्धान्तितमस्माभिः कविद्वयस्य प्रेमादर्शनिरूपणमुखेन।

## ।। ग्रन्थपञ्जी ।।

१. संस्कृत साहित्य सम्भार-१२
२. संस्कृत साहित्य सम्भार-१९
३. उत्तररामचरितम् – ड.सीतानाथ आचार्य एवं देवकुमार दास।
४. भवभूतिर काव्ये मानुष ओ प्रकृति – ड. गुरुचरण दास।
५. विक्रमोवर्शीय – सीतानाथ आचार्य शास्त्री एवं देवकुमार दास।
६. अभिज्ञान शकुन्तलम् – श्री सत्यनारायण चक्रवर्त्ती।
७. अभिज्ञान शकुन्तलम् – श्री अनिलचन्द्र वसु।
८. संस्कृत साहित्येर रूपरेखा –विमानचन्द्र भट्टाचार्य।
९. संस्कृत त्रिधारा – ड. कृष्णगोपाल गोस्वामी एवं आल्पना गोस्वामी।
१०. श्रीकण्ठ भवभूति – श्री राजेन्द्रनाथ विद्याभूषण।
११. शकुन्तला तत्त्व – चन्द्रनाथ वसु।

# रोगोत्पत्तिकारणानामेकं ज्योतिःशास्त्रीयानुशीलनम्

ड. विश्वरञ्जनपतिः

चतुरशितिलक्षयोनिषु जन्ममरणपरम्परायां भ्रमन् जीवः कदाचित् मनुष्यजन्म लभते। तत्रापि प्रारब्धञ्चितक्रियमाणकर्मभिः आध्यात्मिकाधिदैविकाधिभौतिकादिनि नानाविधानि दुःखानि च आसाद्यते। यद्यपि आत्मकल्याणसाधनं जन्ममरणपरम्परायाः विमुक्तिः मानवजन्मनः चरमोऽद्देश्यं तथापि जीवस्य पुर्वजन्मार्जितैः साध्वसाधुकर्मभिः नाना शरीरिकक्लेशाः रोगाः इति अस्माभिः उच्यन्ते। इमे रोगाः कथमुत्पद्यन्ते कथं च तस्मान्मुक्तिः मानवमात्रस्य भवेत् एतस्मिन् बिषये बहु परीक्ष्य प्राचीनशास्त्रकारैः उक्तं यत् – ''पूर्वजन्मार्जितं कर्म व्याधिरूपेण वाधते'' अर्थात् बहुभिः पूर्वजन्मभिः अस्माभिः अर्जितानि कर्माणि तेषां यत् फलं तान्येव कर्मफलानि रोगरूपेण प्रादुर्भूतानि भवन्ति। विविधैः शरीरजैः रोगैरभिभूतः जीवः किमपि कर्त्तुमसमर्थः जायते। तस्मात् सः इहलोकपरलोकात् च्यवते बिस्मरति च आत्मकल्याणं कैबल्यम्। यद्यपि भूमण्डले नैके जीवाः जीवन्ति आहारनिद्राभयमैथुनादीञ्च कुर्वन्ति यद्यपि ईश्वरसृष्टाः सर्वेऽपि जीवाः स्वस्वाधिकारे वर्त्तमानाः समानाः तथापि मानवं विहाय सर्वे भोगप्रधानशीलाः सन्ति। प्रारब्धकर्मणः फलभोगार्थमेव तेषां जन्म तदुक्तं भगवता गीतायाम्–भोगयोनय एव ते।

परं मानवजन्म तेभ्यः भिन्नमस्ति। एतस्मिन् जन्मनि मानवः कर्त्तव्याकर्त्तव्यं विधिनियमं च पालयति। यतो हि मानवाय कर्मसामर्थ्यम् आत्मज्ञानं च ईश्वरेण प्रदत्तम्। ईश्वरप्रदत्तं कर्मसामर्थ्यम् आत्मज्ञानं

च तदा एव सिद्धं भवेत् यदा मनुष्यः कायेन मनसा च स्वस्थः स्यात्। एतेषां स्वस्थताप्तये अस्माकं पूर्वजैः ऋषिमुनिमहर्षिभिः बहवोपायाः निरूपिताः प्रबृद्धानां रोगोणां शमनोपायाश्चापि यथास्थानं तैरालोचिताः। प्रसिद्धधर्मशास्त्रप्रवर्त्तकेन मनुना दीर्घायुष्याय सदानैरुज्याय धर्मार्थकाममोक्षरूपपुरुषार्थचतुष्टयाप्तये च सदा सदाचारस्य पालनयाभिहितः। सदाचारेणैव मनुष्यः आयुर्विभायशोधनादिकमा। किं च कर्त्तव्यपालनेन इहलोकपरलोकसम्भूतदुःखनिवारणे कल्पः भवति। तस्मात् मरणपर्यन्तं ससुखं जीवन् शश्वत् सुखशान्तिं च प्राप्नोति तदुक्तं मनुना–

श्रुतिस्मृत्युदितं सम्यङ् निबद्धं स्वेषु कर्मषु।
धर्ममूलं निषेवेत सदाचारमतन्द्रितः।।
आचाराल्लभतेह्यायुराचारादीप्सिताः प्रजाः।
आचाराद्धनमक्षय्यमाचारो हन्त्यलक्षणम्।।
दुराचारो हि पुरुषो लोके भवति निन्दितः।
दुःखभागी च सततं व्याथितोऽल्पायुरेव च।।
सर्वलक्षणहीनोऽपि यः सदाचारवान् नरः।
श्रद्दधानोऽनसूयश्च शतं वर्षाणि जीवति।।

(मनु ४/१५५-१५८)

रोगोत्पत्तौ कारणानि --

यस्य कस्यापि कार्यस्य किमपि कारणमवश्यमव भवेत् कारणेन विना कार्यं न स्यात् तर्हि मनुष्यशरीरे रोगोत्पत्तेः किं कारणमस्ति तदेवात्र प्रमुखतयालोच्यते। प्रायः प्रत्येकेषु धर्मप्रतिपादकेष्वष्टादशशास्त्रेषु मानवजन्मनि दुःखप्रदायकानाम् इहलोकपारलौकिकश्रेयः नाशकानां रोगाणां च विविधानि कारणानि आलोचितानि सन्ति। तथापि एतादृशस्य बिषयस्य विस्तृतविवरणमायुर्वेदशास्त्रेषु तथा फलितज्योतिषग्रन्थेषु च

उपलभ्यते। मानवशरीरस्य संरक्षणं अभिवर्द्धनं कथं भवेद तत्सर्वम् आयुर्वेदशास्त्रे निर्दिष्टमस्ति। आयुर्वेदस्तु रोगोत्पत्तेः प्रमुखकारणानि वातपितश्लेष्मादनीति ब्रवीति। पुनश्च मनुष्येण कृतस्य दुष्कृतस्य फलरूपेण रोगाः शरीरे समुद्भवन्ति इति महर्षिचरकः स्वसंहितायां निर्दिशति तदुक्तं चरकेण ऋषिणा --

लोभशोकभयक्रोधमानवेगान् विधारयेत्।
नैर्ल्लज्ज्येर्ष्यातिरोगाणामभिध्यायाश्च बुद्धिमान्।।
न वेगान् धारयेद्धमान् जातान् मूत्रपुरीषयोः।
न रेतसो न वातस्य न छर्द्याः क्षवथोर्न च।।
नोद्गारस्य न जृम्भाया न वेगान् क्षुत्पिपासयोः।
न वाष्पस्य न निद्राया निःश्वासस्य श्रमेण च।

(चरक. सं. ७/२७,३-४)

आयुर्वेदेन सह ज्योतिः शास्त्रस्यसम्बन्धः निकटतरः वर्त्तते। आयुर्वेदः आयुस्तत्त्वस्य विशेषविवरणमुपलभ्यते तथैव ज्योतिः शास्त्रे कालतत्त्वस्य समयस्य वा विशेषविवरणमुपस्थाप्यते। द्वयोः सम्बन्धः समाजस्य कल्याणाय एवास्ति। ज्योतिर्विद्यानुसारं तारकाणां त्रयः समुदायाः उपलभ्यन्ते येषां सम्बन्धः आयुर्वेदस्य वातपितादिषु दोषेषु वर्त्तते। यदि कस्यापि जन्मवातसमूहेषु नक्षत्रेषु जायते तर्हि स सदावातरोगाक्रान्तः भवति। कफकारकाणि नक्षत्राणि अपि श्लेष्मारोगानुत्पादयन्ति। यथा कस्यापि मनुष्यस्य बाह्यस्वरूपं विलोक्यान्तशरीरे जायमानान् रोगान् वक्तुं पारयामः, तथैव कस्यापि मनुष्यस्य जन्मकुण्डलीं वीक्ष्य तस्य स्वस्थता विषये सम्पूर्णविवरणं दातुं समर्थाः भविष्यामः। जन्मकुण्डली सम्पूर्णस्य रोगस्यावस्थां उत्पत्तिः कालः आरोग्यस्य समयविषये ''वर्णयितुं समर्थः अस्ति। कश्चन वैद्यः रोगान् वीक्ष्य एव तस्य निवारणे प्रतिविधिं करोति। परं दैवज्ञः

रोगप्रादुर्भावात् पूर्वमेव रोगनिदानं करोति तदर्थं रोगकारणनिरूपणे ज्योतिःशास्त्रस्यालोडनं परमावश्यकम्।

जन्मकुण्डल्यां द्वादशभावाः कारकफलानि च

ज्योतिश्शास्त्रोक्तविधिना जन्मकुण्डल्यां द्वादशभावाः भवन्ति। इमे भावाः सम्पूर्णमानवजीवनस्य स्वरूपं समुपस्थापयन्ति। एतेषां भावानां सम्यगध्ययनेन मानवः स्वस्य भाविजीवनं कथं भविष्यति तत् सम्यग्रूपेणावगच्छति। इमे भावाः यथा --

तनुर्धनञ्चसहज बन्धुपुत्ररिपुस्तथा।
पत्नी निधनं धर्मश्च कर्मचायो व्ययोऽपि च।

एतेषु द्वादशभावेषु रोगनिरूपणार्थं षष्ठभावस्य स्थानं प्रमुखं भवति। ततः अष्टमलग्नद्वितीयभावानामपि अध्ययनं क्रियते। पुनश्च कालपुरुषस्य अंङ्गविभाजनादपि रोगनिरूपणं कर्त्तुं शक्यते। कालरूपिणः पुरुषस्याङ्गविभाजनं लघुजातकैरेवमभिहितम् --

शीर्षमुश्वबाहुहृदयादराणि कटिवस्तिगुह्यसंज्ञकानि।
उरुजानुजंघेचरणाविति राशयोऽजाद्याः।। -- लघुजातकम् --

अर्थात् राशिचक्रे मेषादयः द्वादशराशयः भवन्ति। एते अधोलिखितरूपेण कालपुरुषस्याङ्गानि संसूचयन्ति --

मेषः - शिरः, वृषः - मुखम्, मिथुनः - बाहुः, कर्कः - हृदयम्, सिंहः - उदरम्, कन्या - कटिः, तुलः - उदरस्याधोभागः, वृश्चिकः - गोपनेन्द्रियाणि, धनुः - उरुद्वयम्, मकरः - जानुद्वयम्, कुम्भः - जङ्घद्वयम्, मीनः - पादयुगलम्।

एवं प्रकारेण शास्त्रकारैः कालपुरुषस्याङ्गविभाजनमभिहितम्। एतेषामध्ययनं रोगनिष्पत्तये कथं भवति तदपि तथ्यमेवं प्रदत्तम् --

कालनरस्यावयवान् पुरुषाणां चिन्तयेत् प्रसवकाले।
सदसद्ग्रहसंयोगात् पुष्टाः सापद्रवास्ते च।। इति।

किमर्थमेतत् प्रयोजनं तदा उच्यते इमानि अङ्गानि राशयो वा यदि कस्यापि पुंसः स्त्रियाः वा जन्मकाले पापग्रहैः आक्रान्तानि भवत्ति तदा तानि अंगानि बलहीनानि रोगयुक्तानि च जायन्ते यद्यपि कालपुरुषस्याङ्गानि शुभग्रहैः युक्तानि भवन्ति तदा तानि सबलानि रोगरहितानि च जायन्ते। जातकपारिजातेऽपि कालपुरुषस्याङ्गविभाजनमेवमभिहितम् --

कालात्मकस्य च शिरोमुखदेशवक्षोहृत्कुक्षिभागकटिवस्तिरहस्यदेशाः।
उरूच जानुजुगलं परतस्तु जंघे पाददृयं क्रियमुखावयवाः क्रमेण।।

(जातकपारिजातः - राशि. ८)

रोगनिष्पत्तये द्वादशभावेषु षष्ठभावः प्रप्रथमस्थानमधिगृह्णाति षष्ठभावे अधोलिखिताः विषयाः चिन्तनीयाः भवन्ति।

जातकाभरणं षष्ठभावस्य फलमेवं विवृणोति --

वैरिव्रातः क्रुरकर्मामयानां चिन्ताशंका मातुलानां विचारः।
होरा पारावारपारं प्रयातैरेतत्सर्वं शत्रुभावे विचिन्त्यम्।।

अर्थात् वैरि, क्रुरकार्यं, रोगः, चिन्ता आशङ्का मातुलसम्बन्धिविचारः षष्ठभावात् करणीयः (जातकभरणम् शत्रुभावविचारः-

१) रोगनिदानविषये फलदीपिका एवं प्रस्तौति --

रोगस्य चिन्तामपि रोगभावस्थितैर्ग्रहैर्वा व्ययमृत्युसंस्थैः।
रोगेश्वरेणापि तदन्वितैर्वा द्वित्र्यादिसंवादवशाद्वदन्तु।

(फलदीपिका - १४/१)

अर्थात् जन्मकुण्डल्याः षष्ठभावात् तत्रस्थितग्रहवशात् तदनुअष्टमद्वादशभावयोः विद्यमानग्रहवशात् पुनश्च षष्ठेशेन युक्तग्रहवशात् च रोगचिन्ताकरणीया। जन्मकुण्डल्यां यदि षष्ठभावः पापग्रहैराच्छादितः भवति अथवा पापदृष्टियुक्तः जायते तदा शत्रवः नश्यन्ति रोगाश्च रहिताः भवन्ति यदा शुभग्रहैः षष्ठभावः युक्तः भवति तदा शत्रूणां रोगाणां च प्राबल्यता

जायते। अतः दैवज्ञेन सदा रोगचिन्ताकाले आदौ षष्ठभावस्य ततः अष्टमद्वादशादिभावानां विचारः करणीयः। यदि सर्वेषु भावेषु निष्कर्षः एक एवायाति तदा स एव रोगः प्रष्टुः शरीरे कष्टं प्रयच्छति इति ज्योतिर्विदा वक्तव्यम्। फलदीपिकानुसारं यदि पापग्रहाः षष्ठभावगाः भवन्ति उतः लग्नेशः बलवता षष्ठेशेन युतः वीक्षितश्च भवति चेत् तदा जातकस्य शत्रवः वर्द्धन्ते अनुदिनं च रोगपीडितः भवति। पुनश्च यदि लग्नेशः षष्ठभावगः षष्ठेशः पापयुक्तः दृष्टश्च केन्द्रगः भवति अपि च षष्ठेशः पापैः दृष्टः भवति चेत् तदा जातकस्य रोगाः शत्रवश्चापि वर्द्धन्ते। तदुक्तमस्ति --

स्थितिः पापानां वा द्विषति बलययुक्तारि पतिना।
युतो वा दृष्टो वा यदि रिपुगृहे वा तनुपतिः।।
अरीशः केन्द्रे वाऽप्यशुभश्वसंवीक्षितयुतो।
रिपूणां पीडां द्रागभृशमपरिहार्यां वितनुते।।

(फलदीपिका - भावसमुदाय १५)

जातकपारिजातकरः अपि षष्ठभावात् रोगविषयिणी चिन्ता करणीया इति वक्ति। तन्मतेन मंगलग्रहाद्रोगदुःखशत्रुक्षतानि चिन्तयेत्। स एव भौमः यदि षष्ठभावगतः भवति चेत् तदा जातकः रोगयुक्त इति वदेत्। गुरुः यदि रिपुस्थानगश्चेत् तदा जातः जितारिः जायते। षष्ठेशबुधौ यदि राहुणायुक्तौ भवतः लग्नेशेन सह एषां यदि सम्बन्ध भवति तदा जातः नपुंसकः जायते। तनुपः यदि समंगलः षष्ठभावे तिष्ठति तदा शिश्नरोगसमाक्रान्तः भवति। तदुक्तमस्ति --

रोगारिव्यसनक्षतानि वसुधापुत्रारितश्चिन्तये-
दुक्तं रोगकरं तदेव रिपुगे जीवे जितारि भवेत्।
षण्ढोऽरीशबुधौ बिधुन्तुदंयुतौ लग्नेशसम्वन्धिनौ
लिंगस्यामयकृद् ब्रणेन रुधिरः षष्ठे हलग्नाधिपः।।

(जातकपारिजातः षष्ठभाव - ७१)

पुनश्च षष्ठभावमुपगते शुक्रेण सह सप्तमेशः जातस्य भार्या नपुंसकी जायते अर्थात् विगतयोषितधर्मा भवति। मंगलः यदि षष्ठभावे तिष्ठति पुनः शनेः दृष्टिगोचरीभूतोऽस्ति चेत् तदा जातकः शत्रो कन्यकां विबहति अथवा तस्य पत्नी रिपुः भवति। जन्मनः षष्ठभावे शुभग्रहा भवन्ति चेत् तदा जातकस्य शत्रुतः भीतिः न भवति पुनः पापग्रहैः दृष्टः युक्तः बा षष्ठभावः शत्रुतः अथवा व्रणादिभिः सदा दुःखी भवति।

पत्नी षण्ढत्वमेति क्षतभवनगते कामपे ससुरेज्ये,
भौमे मन्देन दृष्टे रिपुभवनगते शत्रुभार्यामुपैति।
सौम्यैर्दृष्टे युते वा न भयमरिजनाच्छत्रुभे जन्मलग्नात्
पापैः शत्रुक्षतादिव्रणभयबिपुलं जायते लाञ्छनं वा।

जातकपारिजातः भावफला ७२

यदि कोऽपि ग्रह स्वशत्रुस्थानगः नीचराशिगतः वक्रत्वम् अस्तभावमुपगतः षष्ठभावे तिष्ठति तदा बहुशत्रुभिः रोगैश्च पीडितो भवति तथा षष्ठभावे यदि सूर्यादिग्रहाः क्रमानुसारं भवन्ति तदा तेषां फलं स्ववर्गानुसारं जायते यथा – षष्ठभावे यदि गुरुशुक्रौ भवेतां तदा ब्राह्मणेन सूर्यभौमौ चेत् क्षत्रियेण चन्द्र चेत् वैश्येन बुधश्चेत् म्लेच्छजाती येन शत्रुणा प्रपीडितः भवति। षष्ठेशाः षष्ठस्थाः षष्ठभावद्रष्टारः यदि पापाग्रहाः भवन्ति ते चापि यदि दुर्बलाः तदा धनरहिताः रोगाक्रान्ताः च जायन्ते। बलवन्तः शुभग्रहाः यदि स्थानमिदं पश्यन्ति तदा तदा तस्य गोवित्तमश्वादिकं विविधोपस्करयुक्तं राजान्नं रोगारिनाशादिकं भवेदिति वक्तव्यम्। तदुक्तम् --

पापव्योमचरास्त्रयोऽरिपतितत्प्राप्तेक्षका दुर्बला–
गोवित्तक्षयमामयं रिपुभयं कुर्वन्ति जन्मादितः।
ते सर्वे बलशालिनो यदिशुभा गोवित्तमश्वादिकं
राजान्नं सकलोपदंशसहितं रोगारिनाशं वदेत्।।

(जा. पा. षष्ठभाव ७५)

लग्ने पापग्रहैर्युक्तः षष्ठेशः भवति चेत्जातकः बहुव्रणयुक्तं रोगग्रस्तं वा शरीरमवाप्नोति। सोऽयं षष्ठपतिः पापयुक्तः पञ्चमे तिष्ठति चेत् पितापुत्रयोः शरीरे रोगाः सम्भवन्ति। चतुर्थे भवति चेत् मातृशरीरे नवमे भावे भवति यदि मातुलशरीरे तृतीयभावे यदि कनिष्ठभ्रातुः शरीरे लाभे चेत् ज्येष्ठभ्रातुः शरीरे अष्टमे यदि स्वयं जातकः गुदार्त्तः भवति।

पापेलग्नगते सपत्नपयुता देहव्रणं देहिनां
पुत्रस्थे पितृपुत्रयोः सुखगते मातुः कलत्रे स्त्रियाः।
धर्मस्थेसति मातुलस्य सहजे तस्यानुजस्य ब्रणं
लाभस्थे तु तदग्रजस्य निधने जातोगुदार्त्तो भवेत्।।

जा. पा. षष्ठभाव ७८

सूर्यः षष्ठेशेन युक्तः यदि षष्ठाष्टमभावयोः तिष्ठति तदा व्रणादयो रोगाः शिरसि भवन्ति तथा यदि चन्द्रमा भवेत् मुखे व्रणं जायते भौमेन कण्ठदेशे तथाविधः बुध नाभेरधोदेशे रोगाः भवन्ति। गुरुणा आरोग्यं च जायते। षष्ठाष्टमगतः षष्ठेशयुतः शुक्रः नेत्ररोगं प्रकुरुते।

तथैव शनिः वातव्याधिं राहुकेतू उदरव्याधिं कुरुतः। लग्नेशः बधेन दृष्टः यदि कन्यामिथुनयोः भवेत् चेत् तदा भगन्दरादिभिः रोगैर्युक्तं भवेत्। विषयेऽस्मिन् पराशरवचनमपि लक्ष्यतैवम् --

षष्ठाधियोऽपि पापश्चेद्देहे वास्यष्टमे स्थितः।
तदा व्रणं भवेद् देहे कर्मस्थानेप्ययं विधिः।
एवं पित्रादिभावेशात्तत्तत् कारकसंयुताः।
ब्रणाधिपयुताश्चापि षष्ठाष्टमयुता यदि।
तेषामपिव्रणं वाच्यमादित्येन शिरोव्रणम्।
इन्दुना च मुखे कण्ठे भौमेन ज्ञेन नाभिषु।
गुरुणा नासिकायां च भृगुणा नयने पदे।
शनिना राहुणाकुक्षौ केतुना च तथा भवेत्।

**ग्रहाणां अंगाधिकारः रोगकारकत्वं च**

जन्मजातकपत्रिकां वा वीस वयं ऋजाक्रान्तस्य जनस्य रोगकारणानि रोग स्थानानि च निरूपणकर्त्तुं समर्थाः भवामः। प्रत्येकस्य ग्रहस्य अंगाधिकारः वर्तते तत् तत् ग्रहस्य दशा यदा प्रचलति तेषु तेषु अंगेषु रोगाः प्रादुर्भवन्ति। शिरः प्रदेशे वदने च सूर्यस्याधिकारः अस्ति यदा अस्य दशा समायाति तदा जातकस्य शिरसि अथवा मुखमण्डले रोगाः भविष्यन्तीति वक्तव्यम्। एवमेव शशिनः वक्षस्थले, भौमस्य पृष्ठे उदरे च अधिकारः अस्ति तथैव बुधस्य हस्तपादयोः कटिप्रदेशे जघने च जीवस्य शुक्राचार्यस्य गुह्यस्थले जानूरुदेशयोः शनेः अधिकारः इति प्राज्ञाः वदन्ति।

यदा एते ग्रहाः प्रतिकूलाः भवन्ति तदा ते प्रोक्तेष्वङ्गेषु पीडां जनयन्ति। कस्यापि जनस्य जन्मकुण्डलीं वीक्ष तस्य जन्मकाले तथा दशाभोगकाले तेषु तु अङ्गेषु कष्टदायकाः रोगाः भविष्यन्ति इति वक्तव्यम्। तदुक्तमस्ति –

शिरः प्रदेशे वदने दीनेशो वक्षस्थले चापि गले कलावान्।
पृष्ठोदरे भूतनयप्रभुत्वं करोति सौम्यश्चरणे च पाणौ।
कटिप्रदेशे वदने च जीवः कविस्तु गुह्यस्थलमुस्कदेशे।
जानूरुदेशे नलिनीशसुनुश्चारेण वा जन्मनि चिन्तनीयम्।।

ज्योतिःसाररत्नावली पृष्ठ ५४–५५

यदा यदास्यात् प्रतिकूलवर्त्ती
स्वाङ्गेस्वदोषेण करोति पीडाम्।
इदं तु पूर्वं प्रविचार्य सर्वं
प्रश्नप्रस्तूत्यादिषु कल्पनीयम्।।

पुनश्च आदित्यादिनवग्रहाणां रोगकारकत्वमपि ज्यातिःशास्त्रोक्तेन विधिना निरूपयिष्यामः। ज्यातिःशास्त्रानुसारं जन्मजातके यदा यस्य ग्रहस्य

दशाचलति उतः गोचरेऽपि यस्य ग्रहस्याशुभत्वमायाति तस्य ग्रहस्यानुगुणं रोगाः अपि मानवशरीरे समुद्भवन्ति। अत्र वातपित्तश्लेष्मादीनां त्रिविधशारीरजदोषाणामाधारेण ग्रहाणां वर्गीकरणं विधाय ज्यातिर्विदः तत् तत् अंगानि च विचार्य रोगनिरूपणं कुर्वन्ति। ग्रहाणां प्रकृति आधारेण रोगनिदानमपि एवं कर्त्तुं समर्थाः भवामः। यथा–

पित्तौ प्रभाकरः क्ष्माजौ श्लेष्माणौ चन्द्रभार्गवौ।
ज्ञगुरुसमाधातु च पवनौराहुमन्दगौ।।

अर्थात् भौमदिवाकरौ पित्तरोगकारकौ चन्द्रभार्गवौ कफररोगकारकौ च भवतः एवमपि बुधगुरू समधातुयुक्तौ तथा मूलशनिराहू शरीरे वातवृद्धिकारकौ भवतः। यदा एतेषां ग्रहाणां दशा जन्मजातके आयाति तथा प्रोक्तानां वातपितकफादीनां दोषाणां ग्रहदशानुसारं वृद्धिः जायते।

एवं सम्यक्प्रविचार्य दैवज्ञेन पृच्छ्कवस्य शरीरे के रोगाः भवितुमर्हन्ति तत् वक्तव्यम्। पुनश्च जातकपारिजाते को ग्रहः कस्य रोगस्योत्पादकः तस्य निरूपणमपि तत्र कृतमस्ति तद्यथा --

सदाग्निरोगज्वरवृद्धिदीपनक्षयातिसारादिकरोगसङ्कुलम्।
नृपालदेवावनिदेवकिंकरैः करोति चित्तव्यसनं दिवाकरः।।
पाण्डुदोषोजलदोषकामलापीनसादिरमणीकृतामयै।
कालिकासुरसुवासिनीगणैराकुलं च कुरुते च चद्रमाः।।
पीनवीजकफशास्त्रपावकग्रन्थिरुग्व्रणदरिद्रजामयैः।
वीरशैवगणभैरवादिभिः भीतिमासुः कुरुते धरासुतः।।
गुह्योदरादृश्यसमीरकुष्ठमन्दाग्निशूलग्रहणीरुगाद्यैः।
बुधादिविष्णुप्रियदासभूतैरतीवदुःखं शशिजः करोति।।
आवा देवगुरुभुसुरशापदोषैः शोकं च गुल्मरुणमिन्द्रगुरुः करोति।
कान्तबिकारजनिमेहरुजासुराद्यैः स्वेष्टाङ्गनाजनकृतैभयमासुरण्यः।।
दारिद्र्यवीपिजकर्मपिशाचचौरैः क्लेशं करोति रविजः सह सन्धिरोगैः।

कण्डूमसूरिरिपुकुत्रिमकर्मरोगैः स्वाचारहीनलघुजातिगणैश्चकेतुः ।।
करोत्यपरस्मारमसूरिरज्जुक्षुद्दृक्कृमिप्रेतपिशाचभूतैः ।
उद्बन्धनेनारुचिकुष्ठरोगैर्विधुन्तुदश्चातिभयं नराणाम् ।।

जातकपारिजातः गुणभेदे ७५-८१

अर्थात् ग्रहराजः सूर्य स्वदशाबिपाके मनुष्यस्य शरीरे ज्वर यक्ष्मा अतिसाररोगैः तथा राजादेवताब्राह्मणादिभिः भयं च उत्पादयति। शीतकरः चन्द्रमा स्वदशाविपाके जातकस्य शरीरे पाण्डुरोगः जलदोषः स्त्रीजनितरौगैः पीडामुत्पादयति तथा कालिकादेवीदेवै सुवासिनीभिःश्च स्त्रिभिः व्यथां प्रयच्छति। धरासूतः मङ्गलः पीनवीज-कफ-शस्त्र पावकग्रन्थिरुजा कष्टं ददाति वीरैः शैवगणैः भैरवैश्च आशुः कष्टं लभते।

शशिजः बुधः स्वदशाभोगकाले गुह्यरोगेण उदररोगेण वायुकुष्ठमन्दाग्निना च रोगेण कष्टं प्रयच्छति, वैष्णवाः भूतपिशाचाश्च तं कष्टं प्रयच्छन्ति।

वृहस्पतिः - वृहस्पतिः आचार्यब्राह्मणदेवशापजव्याधिभिः दुर्वाक्यदोषैश्च कष्टं जनयति।

शुक्रः - असुरेज्यः शुक्रः स्त्रीबिकृतजनितप्रमेहरोगेण स्वाभिलषितस्त्रीद्वारा कष्टं प्रयच्छति।

शनिः - शनैश्चरः दूषितः यदा जन्मकुण्डल्यां तिष्ठति तदा दारिद्र्यदोषं, पिशाचचौरादिभ्यः क्लेशं सृजति।

केतुः - जन्मकुण्डल्यां दूस्थानगः केतुः सन्धिरोगकण्डुरोगचर्मरागैश्चाक्रमति कष्टं च जनाय प्रयच्छति। नीचजातीयाः जनाः तस्य वैरतामाचरन्ति।

राहुः - अपस्मारः पाशवन्धनं संक्रामकरोग-नेत्ररोग-कृमिरोगकारकः राहुः भवति। भुतप्रेतपिशाचादिभिश्चभयं जनयति राहुः। कदाचित् कारागृहात् कुष्ठरोगाद्वापि मनुष्यस्य भीतिः जायते।

समग्रं सचराचरं जगत् ग्रहाधीनं वर्तते। ग्रहाणां गतिप्रभावानुसारेण दृश्यमाने विश्वे विशिष्टं परिवर्त्तनं भवति पृथिव्यादिपञ्चभूतनामपि परिवर्त्तनं जायते।

एतेषामेव प्रभावेण मनुयशरीरे उत तीर्यग्योनिनां मृगपशुपक्षिणां शरीरेऽपि बिकाराः जायन्ते। त एव विकाराः अस्माभिः रोग इति पदेन उच्यते। जन्मकुण्डल्यां ग्रहावस्थितिवशात् यथातथ्यं शरीरे जायमानानां रोगाणां विषये कश्चन दैवज्ञः निश्चितरूपण प्रतिपादयितुं समर्थो भवेत्। अतः ज्योतिःशास्त्रस्य सम्यगालोडनं यद्यस्माभि क्रियेत तर्हि रोगरूपकस्य दुःखस्य उत्पत्तेः प्रागैव तस्य प्रतिनिवारणे समर्थाः भविष्यामः। पुनश्च प्राणिमात्रस्य मानवसमाजस्य च महत् कल्याणं च भवेत्।

सहायकग्रन्थाः –

१. वृहतपाराशरी
२. मनुसंहिता
३. चरकसंहिता
४. लघुजातकम्
५. फलदीपिका
६. जातकपारिजातम्

..............

# ग्रन्थसमीक्षा




ग्रन्थनाम - ब्रह्मनिलये
रचयिता - आचार्यः प्रफुल्लकुमारमिश्रः
समीक्षकः - ड. बुद्धेश्वर षडङ्गी
प्रकारः - मौलिकी कृतिः
प्रकाशकः - धारा श्रीराधा ट्रष्ट
अमरेन्द्रमहापात्र
एम्. ३/४९, मारुति विहार,
लैन्-२
रघुनाथपुरजलि, था.
नन्दनकानन,
भुवनेश्वरम् - ७५१०२४
पृष्ठम् - ६७२
संस्करणम् - प्रथमम्
प्रकाशनवर्षम् - २०२१
मूल्यम् - ६२१/-
ISBN - 978-81-948078-6-5




ग्रन्थनाम - नेत्रप्रान्ते निस्पन्दसमयः
रचयिता - आचार्यः अरुणरञ्जनमिश्रः
समीक्षकः - ड. शुभ्रजित् सेन
प्रकारः - मौलिकी कविताकृतिः
प्रकाशकः - वनारस मर्काण्टाइल एण्ड् को.
महात्मा गान्धी रोड,
कोलकाता-
पृष्ठम् - १४७
संस्करणम् - प्रथमम्
प्रकाशनवर्षम् - २०२१
मूल्यम् - ३००/-
ISBN - 978-81-86359-81-8

# "ब्रह्मनिलये" इति काव्यबन्धे काव्यतत्त्वविमर्शः

ड. बुद्धेश्वरषडङ्गी

"ब्रह्मविद् ब्रह्मैव भवति"[१] इति ब्रह्मतत्त्वविदां ज्ञाननेत्रोत्था वैखरी ब्रह्मणः ब्रह्मविदा सह कञ्चनं शिवमयं सम्पर्कं सूययति स्थावरजङ्गमात्मकेऽस्मिन् जगत्प्रपञ्चे सर्वत्र ब्रह्मणो निलयो विद्यतं एवेति रहस्यं यदा कश्चन तत्त्वदर्शी अनुभवति शिष्यकुलञ्च अनुभावयति तदा स एव ब्रह्मविद् भवति। सत्यमेतत् ब्रह्मणः सकाशात् जगतः सृष्टिः, प्रलये च तत्रैव विलयः।[२] स एव ऋषिः दर्शनसामर्थ्यधर्मात्, ज्ञानी प्रज्ञानवेतृत्वात्, कविश्च व्यङ्ग्यतत्त्वकवनात्। उशनसः प्रमुखतया कविराख्या यदि वा वैदिकमार्गे वर्त्तते तथापि सर्वेषां मन्त्रद्रष्टृणां कृते कविशब्दस्य प्रयोगः ऋक्संहिताया बाहुल्येन प्रदत्ता। कविरेव ब्रह्मविदिति विमृष्टिरपि न शङ्काकलङ्के हेतुस्स्यात्। नवनवोन्मेषशालिन्या प्रज्ञया रसमयं मार्गमाश्रित्य दुरूहतत्त्वानामुपस्थापने कविरेव कुशलो नान्यः। अतो वैदिककालाद्यप्रमृतिः काव्यगङ्गायाः लोककल्याणदायिनी नवरसत्त्वोद्भासिनी काव्यमन्दाकिनी विच्छिन्नेतरधारया प्रवाहिता अस्ति। लक्ष्यं त्वस्या श्रमार्त्तानां शोकार्त्तानां मायामोहग्रस्तानां मानवानां हृदये रसानन्दात्मिकायाःशान्तेरुपस्थापनम्। तादृशं लक्ष्यमनुकुर्वता काव्यशास्त्रविनोदधर्मधनभृता आयार्य प्रफुल्लकुमारमिश्रेण काव्यबन्धो विरचितोऽस्ति, यत्र प्रकृतेः कमनीयता, कर्कशता च, मानवजीवनस्य विविधाः अवस्याः, लोकमङ्गलमार्गान्वेषणपराः व्यवस्थाः, मायायाः विचित्रता, स्वार्थान्धस्य पशुता, धनीकस्य ऋक्षता, दारिद्रयस्य दुस्थितिः, कामस्य विकटता, परमतत्त्वस्य सारता च स्पष्टतया शब्दमूर्त्या कविना गुम्फिताः। ब्रह्म एव सर्वेषां निलयः, यत्र भूतानि लीयन्ते, यस्माच्च

प्रादुर्भवन्ति, अतएव सृष्टिस्थितिसंहारधर्मविशिष्टोऽयं निलयः। विकाररहितमपि आत्मेच्छया जायते, आत्मेच्छया च लीयते। जगन्निर्मिमिक्षया त्रिगुणात्मकं सत् स्वयमेकांशेन जायते, प्रपञ्चं च वितनोति। सृष्टेः विकृतस्वरूपदर्शनानन्तरं स्वयंमेव स्वस्मिन् लीयते। महाप्रलयकर्तृत्वं च भजते। लोकसाधारणवस्तुना जीवजगतः परमरहस्यं प्रतिपित्सया कविवरेण काव्यबन्धोऽयं ग्रथितः।

ग्रत्थस्य कलेवरम् -- विभर्त्ति काव्यबन्धोऽयं कवेः सूक्ष्मेक्षिकया दृष्टानां नवसख्याकानां काव्यानां कलेवराणि। प्राचीनालंकारिकसरण्या सह अत्याधुनिककाव्यबन्धस्य धर्माः अत्र सङ्कलने पृष्कलाःसन्ति। भिन्नभिन्नकालेषु कवेः ब्रह्मणः विचित्रा सृष्टिर्यथा समवलोकिता तथा तेनात्र प्रत्यपादि। सम्पूर्णकलेवरस्य नव अङ्गानि यथा --

१. चित्रकुरङ्गी – (कालः – १९९५) – कवितानां संख्या – ३३

२. तव निलये – (कालः – २०००) – कवितानां संख्या – ४१

३. ब्रह्मनाभिः – (कालः – २००१) – कवितानां संख्या – २०

४. कोणार्के – (कालः – २००१) – कवितानां संख्या – १८

५. चित्राङ्गदा – (कालः – २००१) – नाटिका – षटदृश्यात्मकम्

६. कृषकस्य कथा – (कालः – २००१) – कथाकाव्यम्

७. चत्वारि शृङ्गा – (कालः – २००९) – कवितासख्या – ८६

८. मनो जङ्गमे – (कालः – २०१०) – कवितानां संख्या – ४२

९. तथापि सत्यस्य मुखम् – (कालः – २०११) – कवितानां संख्या – ६४

ग्रन्थस्य द्वितीये भागे काव्यशास्त्राध्ययनानुशीलनतत्परस्य कविश्रीसोमनाथदाशस्य पृष्ठलेखोऽपि सङ्कलितः। तत्र प्रफुल्लमिश्रकवेः कविभारती सम्यकतया प्रशंसिताऽस्ति। कवेः सक्षिप्तयपरिचयोऽपि उल्लिखितः।

ग्रन्थस्य तृतीयभागे सर्वासां कृतीनां सम्यागाकलनं कृतमस्ति। ६३६ पृष्ठात्मकोऽयं काव्यबन्धः अर्वाचीनसंस्कृतकाव्यनां प्रकाशस्तम्भम्य इव

राराजते।

संस्कृतसाहित्यार्णवे सत्सु विषयबाहुल्येषु नैके विषयाः नूतनशैल्या नूतनदृष्ट्याऽपि नावलोक्यन्ते। फलतः चिरन्तनसाहित्यप्रवाहे किञ्चिन्नूतनतरङ्गस्य दर्शनं सर्जनञ्चाभूत्। कविः स्वयमेव ग्रन्थस्य वैशिष्ठ्यं भूमिकायां वदति यथा –

महदिदं प्रमोदस्थानं मत्कृते यदिदानीं ''ब्रह्मनिलये'' इति शीर्षकोपेतं काव्यकदम्बमिदं प्रकाशतामानीयते। सम्पूर्णमिदं जगद् ब्रह्मणः निलय एवास्ति। अस्मिन् मानवजगतः सुखं दुःखं सर्वं विवर्तते। मम जीवने चित्रकुरङ्गीतः काव्ययात्रा प्रारम्धाऽऽसीत्। मद्ग्रामस्थे नातिदूरे विश्वप्रसिद्धं कोणार्कसूर्यमन्दिरम्। तस्य नैसर्गिकं सौन्दर्यमाबाल्यतः शताधिकवारं दृष्ट्वा प्रस्तररूपं काव्यमवलोक्य तदनुगुणं काव्यं बहुप्रकारेणाकलय्य अक्षरसात्कर्त्तुकामेन ऐदं प्राथम्येन तित्रकुरङ्ग्याः कल्पना मया यिहिता। तथाऽपि न सन्तुष्टतां गतं मेऽन्तरङ्गं मनः। फलतः कोणार्कस्योपरि दीर्घकविता उल्लिखिता। एकैकशःतत्र विद्यमानां लघु-बृहत्प्रतिमाम् अवलोक्य ''कोणार्के'' इति काव्यकदम्बस्य सर्जनं कृतम्।एकैकं मूर्तिफलकं मच्चिते यथा भावकदम्बमसृजत् तदनुगुणं चित्रितं मे काव्यचित्रम्। महाभारतकथामाश्रित्य विरचितं खण्डकाव्यं ''चित्राङ्गदा''। तथैव कर्पासकृषकाणां दुर्दशामवलम्ब्य कृषकस्य कथा विरचिता। देवदेव-जगन्नाथस्य छायायां व्यतीतं मे जीवनम्। अत्र दारुब्रह्मणः श्रीजगन्नाथस्य नाभौ ब्रह्मपदार्थः विद्यते। परन्तु सकलं केवलं काष्ठमात्रम्। संसारस्य असंख्यपीडाः सोऽपि अनुभवति। अतः दारुरूपेण निस्पन्दः केवलं कश्चित् पीडितगृहस्यैव अन्तः नाभौ स्पन्दते सः। परमेश्वरस्य मनुष्यनिमित्तं गृहीतस्य दुःखस्य परिप्रकाशो भवत्यत्र। ''तव निलये'' इत्यस्य रचना उत्तराधुनिकभावानां समुच्चयेन भवति। तदनु ''चत्वारि शृङ्गा'' इति वैदिकचित्रस्य उत्तराधुनिकचित्रे प्रयोगः प्रदर्शितः। पुनः मनसि का चेतना मनुष्यमान्दोलयति इत्यत्र पिहितमस्ति। परन्तु ये योगिनः सत्यश्रुतयः

साधकाः भवन्ति, ते तत्सर्वमुद्घाटयितुं यतन्ते। एतत्पुरस्कृत्य ''तथापि सत्यस्य मुखम्'' इति शीर्षकं कल्पितम्।[३]

अर्वाचीनकविताकोविदेन कविप्रफुल्लमिश्रेण शब्दाडम्वरे वैमुख्यं प्रकटयति। कालिदासकवितालावण्यातिशायिनं प्रसादगुणं समादृत्य स्वशब्दमूर्त्तिं रूपयति येन सामान्यपाठकोऽपि संस्कृतशब्दशार्दूलभीति-मुक्तस्सन् कवेः व्यङ्ग्यवस्तु सम्यगाकलयितुं क्षमो भवति। वस्तुतः अध्यापनकलाकुशलेन मिश्रवर्येण स्वानुभूतिमत्र पाथेयीकृत्य कविताकवनमना इति न काचिद्विप्रतिपत्तिः। अथापि संस्कृतेतरभाषानेदिष्णाः क्लिष्टदीर्घसमासात्मविकटकाव्यबन्धे स्वारुचिं प्रकटयन्ति किञ्च दुरूहताऽपि काव्यस्यैको नित्यदोषः इव चिन्तयन्ति काव्यशास्त्रिणः। दर्शनादिशास्त्रे यथा विकटबन्धो भूषणं भवति न तथा काव्यमार्गे । प्रसादगुणाढ्या वैदर्भीरीतिसमलङ्कृता भारती एव विश्वसाहित्ये वन्दनीया भवति। सम्पूर्णे काव्यबन्धे कवेः एतादृशं चिन्तनं प्रतिफलितमस्ति। अपरतः अर्थगाम्यीर्ये कवितानां नृपता तथा जीवनदर्शनोपस्थापने प्रौढता सहृदयहृदयग्राहिण्यौ एव। दिङ्मात्रं जीवनरहस्यमत्र उदाह्रियते यथा **चत्वारिशृङ्गा**काव्यस्य जडभरतकवितायां --

स्वप्तस्य जालेनाच्छादितं जगत्सर्वं
न मन्यते जालमस्ति कुत्रचिद्वा
जालं विना जीवनमस्माकंमत्यन्तमलक्ष्यम्
अस्वच्छन्दं दिवानिशं
स्मरणं सरणं चाप्यत्यन्तं सामान्यम्
जीवनं जीवनं क्वापि मरणं मरणं भवेत्।।[४]

अत्र मृत्युभीतिं विसृज्य मानवः परमपुरुषे मतिं निधाय सानन्दं जीवेदिति कवेः आवेदनं स्पष्टीभवति। माया सर्वत्र वर्तते। मायाच्छादितोऽपि मानवः स्वकृत्याकृत्यविवेचनपरः सन् सुखेन जीवेदिति वार्त्ताऽपि व्यङ्ग्येन प्रदत्ता।

परम्परारक्षणतत्पराः अद्यापि स्वजीवनं तुच्छीकृत्य देवसेवायै दत्तप्राणा इति किञ्चित् पारम्परिकं सामाजिकचित्रं तत्रैव **चत्वारिशृङ्गा** काव्यांशे देवदासीकवितायां प्रस्तौति यथा --

शून्यगृहे भग्नकुटीरे शोचति
देवदेवस्य पत्नी देवदासी।
पत्राकाराः नेतारः ''साम्पेन''चषते
चीत्कुर्वन्ति।
हा हा तपस्विनी, हसति सा
हसति च जगन्नाथः रङ्गाधरे।.....
........ सहस्रवाद्योद्यमकराभितृष्णया
प्रेक्षन्ते त्वदीयां च्छन्दायितां गतिम्।
नरपतेः ताम्बुलरक्ताधरदरहसात्
पण्डामुख्यस्य चञ्चलनेत्राङ्कितः हतासि।[५]

मायामोहान्धानां चरितमुपस्थापयता कविना **मनोजङ्गमकाव्ये** ''संयुक्तता'' इति कवितायां कामविकारं प्रस्तूयते यथा

अधररागेण प्रकटिता हृत्स्फोटता।
मन्मथपञ्चशरैः द्रवित्वा पञ्चत्वगमने
रागाधिष्ठितस्निग्धचक्षुषा दृष्ट्वा
झटिति शान्तस्तिग्धेन लभसे शीतलताम्।।[६]

अत्र कामासक्तस्य प्रियाधरलग्नां दृष्टिं शृङ्गारधर्मेण संयुज्य कविः जीवनस्य भिन्नं सुखं प्रख्यापयति। सर्वत्र स्वप्रेमदृशा जीवः सुखमश्नुयादितिवार्ता अत्र प्रदत्ता।

इत्थं प्रसादगुणमाश्रित्य आध्यात्मिकचिन्तानेन सह सामाजिकचित्राणि कविना समुपस्थापितानि। पारम्परिकछन्दसां संधटनां विनाऽपि व्यङ्ग्यमार्गेण रसानन्दप्रदं काव्यवस्तु सर्वत्र लघुकवितासु पाठकैः दृश्यते। आधुनिकसाहित्ये यथा विभिन्नभाषाकोविदाः कवयः

काव्यं निर्मान्ति तथा कविवरेण भावपक्षं समाश्रित्य स्वरचनाप्रपञ्चं विस्तारयति। चित्तवृत्तेः चलचञ्चलता चित्रकुरङ्गीकाव्ये, प्रस्तरमूर्त्तिमध्ये सम्भ्रान्तजीवनस्य गाथा कोणार्ककाव्ये महाभारतीया मनोवृत्तिः चित्राङ्गदाकाव्ये, वैदिकचिन्तनस्य आधुनिकदृष्टिः चत्वारिश्रृङ्गाकाव्ये, मायामोहस्थितिं च तथापि सत्यस्य मुखे काव्ये, अन्नब्रह्मणः समुपासकानां कृषकाणां दुरवस्था कृषकस्य कथाकाव्ये दर्शं दर्शं को वा पाठकः मिश्रमहोदयस्य काव्यभारतीं न प्रशंसेत्? जीवनस्य परमरहस्यमुद्घाटयता तेन ब्रह्मसुखसान्निध्याय निलयस्य कल्पनं विधाय काव्यमार्गे विडौजा इव समुल्लसतीति निश्यप्रचं वचः ।।

पादटीका --

१. स यो ह वै तत्परमं ब्रह्म वेद ब्रह्मैव भवति नास्याब्रह्मवित्कुले .... मूण्डकोपनिषद्/३/२/९

२. यतो वा इमानि भूतानि जायन्ते। येन जातानि जीवन्ति। यत्प्रयन्त्यभिसंविशति। तैत्तिरीयोपनिषद्/भृगुवल्ली/१/१

३. ब्रह्मनिलये भूमिका

४. जडभरत कविता – पृ. २९७

५. देवदासी कविता– पृ.३०६

६. संयुक्तता कविता – पृ ४०९

# कवि-अरुणरञ्जनमिश्रकृतो नेत्रप्रान्ते निस्पन्दसमयः- एका समीक्षा

ड. शुभ्रजित् सेनः

अर्वाचीनकाव्यसंसारे मात्रावृत्तानि गणवृत्तानि चानादृत्य मुक्तकच्छन्दसा स्वाभिव्यक्तीर्नवीनान् बिम्बांश्च प्रस्तौति उत्तराधुनिककविः अरुणरञ्चनमिश्रः। कवेरस्य द्वितीयः काव्यग्रन्थस्तावत् 'नेत्रप्रान्ते निस्पन्दसमयः'। इह काव्यसंकलने ऊनषष्ठिः उत्तराधुनिककविताः स्थानं प्रापिताः। इमाः कविताः पार्थिवः जगत् अतिक्रामन्त्यः अपार्थिवं काव्यसंसारं सुवते। अत्र संकलितानि काव्यानि सर्वाण्येव काव्यमार्गस्य नवीनाः सम्भावनाः समुन्मीलयन्ति। कवेरस्य नवनवीनं बिम्बविधानं कल्पनायाः उत्तुङ्गतां स्पृशत् सहृदयहृदयताम् आतनुते। कवेररुणस्य कवितासु पूर्णतः प्रेमाश्रितभावानाम् आतिशय्यं पाठकानां नयनपथे पान्थायते।

सममेव भावान् आदाय कविना नूत्नानि रूपकाणि, रुचिराः कल्पलोकाः प्रतीयमानार्थाश्च समाश्रितानि। काव्यग्रन्थस्य प्रस्तावनायां त्रिपाठिनो मतिरियं यत् कवेररुणमिश्रस्य काव्येषु उत्कलीयकवेः केशवचन्द्रमिश्रस्य संस्कृतकविता पुनरुज्जीवति।

अस्मिन् काव्यसंकलने नायिका स्वाभीष्टान् वक्ति स्वकाव्यपुरुषम्। समयस्य धर्मो गतिमयत्वमिति कृत्वापि सा कवेः कपोलकल्पिता नायिका नायकगते नेत्रप्रान्ते समयस्य निस्पन्दनत्वं नाम भावलेशहीनत्वम् आविष्करोति। 'निस्पन्द समयः' इति विग्रहे 'विशेष्यं विशेष्येण बहुलम्' इति सूत्रेण कर्मधारयः। नायिकानिष्ठसौन्दर्यातिशयत्वं प्रेक्षं प्रेक्षं नायकस्य अक्षिद्वयं स्पन्दनहीनमिति प्रतिभाति। निस्पन्दपदेन नायकस्य

नेत्रयोर्विश्वासोऽभिव्यज्यते। नायकस्य निरीहाहंकारस्य प्रांशुप्राचीरस्य परस्मिन् पार्श्वे आत्मविलोपकस्य जनस्य समग्रं शरीरं दीर्घश्वासमयम् उदासीनं जातम्। तदुक्तं कविना –

"तव निरीहाहंकारस्य प्रांशुप्राचीरस्य
परपार्श्वे लुक्कायितः
कश्चिदेक आत्मविलोपको जनः
पुष्पप्रस्फुटनशब्दैर्यस्य समग्रशरीरम्
उदासीनं दीर्घश्वासमयम्। संन्यासिनस्तव
नेत्रप्रान्ते निस्पन्दसमयः"।। (नेत्रप्रान्ते निस्पन्दसमयः)

छन्दोराहित्यं समसामयिकसंस्कृतकाव्यस्य वैशिष्ट्यमेकं, नाट्यशास्त्रेऽप्यस्य पूर्णसमर्थनादिति। कवेररुणरञ्जनस्य काव्यग्रन्थोऽयं पूर्णतया शास्त्रसिद्ध इत्यत्र नास्ति संशयलवः कश्चित्। पुरावृत्तानि कविः नूत्नाङ्गिकेन स्वमनसोमाधुरीं सम्मिल्य च प्रस्तौति स्वकाव्यमालायाम्। दिङ्मात्रम् उदाहरणं तावत् –

"अद्य कुबेरः पद्मवनकारण्डवः।
रामगिरिः प्रेमशिलास्थली।
स चाकाशभाषिताभिशापः
आवयोः क्रीड़ाशैलस्य विनिद्ररजनी"।। (नीलोत्पलशरः)

काव्येऽस्मिन् कविः प्रेमस्वरूपम् अद्धा उन्मीलति। प्रेम्णोऽलौकिकत्वं व्याकुर्वन् कविः क्वचिन्मूर्तनम् अपाकृत्य विमूर्तभावराजिं प्रतनुते स्वकाव्यप्रसूते। किञ्च, 'अहं सुवर्णा', 'अहं तवावन्तिका', 'सुवर्णा कोणार्ककन्या' चेति कवितासु कवेरन्तःलीना काल्पनिकी कपोलकल्पिता प्रेमोपजीव्या फल्गुधारा सततं प्रवहतितराम्। कविरयं कल्पनाक्षेत्रात् कवेर्मानसिकीं नायिकां वास्तवरूक्षभूमावतारयति –

"कदा कदा मया स्वसमक्षं प्रतिज्ञातः।
तच्छून्यग्रहे शून्याभिसारः।
प्रतिज्ञातं विस्मरणं तव
शृङ्गारोपचारस्य।
अथ च हृदयशतदले त्वं।
निश्चलभ्रमरः"।। (हृदयस्य निःशब्ददहनम्)

कवेरस्य कवितासंग्रहे प्रतिपदं नारीवादस्य ध्वनिर्नित्यं प्रतिध्वन्यते। संस्कृतसाहित्ये कवेरयं प्रयासोऽद्वितीयो यत्र सम्पूर्णस्यास्य काव्यस्य वक्त्री नायिका, श्रोता च नायकः। जीवनसम्पर्कितामभिनवां धारणां कवयिता नायिकामुखेन विवृणोतीति।

समसामयिककवीनां काव्यव्रातेषु पारम्परिकोपमानोपमेययोः प्रयोगाःभिन्नमार्गावगाहिन इति निश्चप्रचम्। अत्रापि 'मदनतान्त्रिक' इति कवितायाम् अंशविशेषः संस्मरणीयः –

"ततोऽहं पृथ्वी। सः
वारंवारं वर्षणप्रवणो मेघः।
स पवन इव पलायितः।
अहं विदलितवन्यपुष्पाणीव
शाद्वले विक्षिप्ता।
शरीरे मनसि च
स्नानवस्त्रमिव सिक्ता"।

कविररुणरञ्जनः काव्यगतां पारम्परिकरीतिमुल्लङ्घ्य प्रादेशिकभावधारां वैदेशिकीं शैलीञ्चानुसृत्य विलक्षणमेव भावबोधं विनिर्माति। उत्तराधुनिककाव्यमिव नेत्रप्रान्ते निस्पन्दसमयः इति काव्यसंकलनमपि क्वचित् प्रत्यादिश्यन्ते महत्योऽपि परम्पराः लघुपरम्पराभिः, प्रदीयन्ते क्वचिच्च दलितजनानां व्यथाभ्यः स्वराः,

विलक्षणं काव्यिकसंविधानं समाश्रयते।

कवेरस्यालंकारप्रयोगोऽदृष्टपूर्वः। वैदर्भीरीतेः स्वच्छन्दःप्रयोगशीलता सहृदयानाञ्चेतश्चोरयति। व्यतिक्रमाः स्वच्छाः प्रतीयमानार्थाः काव्यसंग्रहस्यास्य प्रतिच्छत्रं प्रतिध्वन्यन्ते। अपृथग्यत्ननिर्वर्त्यतया स्वतन्त्रतया च कविरयं काव्यिकरीत्या जीवनस्य प्रेम्णश्चाभिनवा दिशोऽभिव्यनक्ति।

कवेररुणरञ्जनमिश्रस्य विलक्षणजीवनाश्रित-भावराज्युपेतकविताावली सहृदयहृदयस्पन्दिनी। कवेरचना छन्दोबद्धहीनापि राग-लयसम्बद्धा रुचिरालंकारभूयिष्ठा प्रतीकधर्मिणी मर्मस्पर्शिनी प्रतीयमानार्थयुता चेति। लौकिकपरिवेशमुपजीव्य ग्रथितस्यास्य मुक्तककाव्यसंकलनस्यास्वादोऽलौकिकः। काव्यग्रन्थस्यास्य बर्णिलं प्रच्छदं सत्यमेव चित्ताकर्षकम्। काव्यस्यास्य सर्वविधं प्रचारं कामये।

## Writer's World

1. **Nath Arpita**
Asst. Prof., Dept. of Sanskrit, Basantidevi College, W.B
2. **Pujara Preeti R.**
Asst. Prof. Dept. of Sanskrit, DCM. Arts & Commerce College, Viramgam, Ahmedabad.
3. **Sharma Madandeb**
Asst. Prof. Dept. of Sanskrit, Raiganj University, W.B
4. **Mal Jagdish**
M.Phil. Dept. of Sanskrit, Raiganj University, W.B
5. **Mal Swapan**
Asst. Prof. Dept. of Sanskrit, Raiganj University. Uttar Dinajpur, W.B.
6. **Ray Suraj**
Ph.D. Scholar, Dept. of Sanskrit, Raiganj University, W.B
7. **Mandal Rahul**
Ph.D. Scholar, National Sanskrit University, Tirupati.
8. **C.R. Agalya & Dr.Rajkumar K**
M.Phil Scholar & Asst. Prof. PG & Research Dept of English, Nehru Arts & Science College, Coimbatore-641105
9. **Sheeba M.S.**
Associate Prof. Dept. of Sanskrit,Maharaja's College Ernakulam.
10. **Gogikar Prakash**
Asst. Prof. Dept. of Sanskrit, Nizam College, (Auto), Osmania University,. Hyderabad, Telangana-500086
11. **Satpathy Swetaapadma**
Asst. Prof. Dept. of Sahitya, National Sanskrit University,Tirupati
12. **Sikder Tania**
Asst. Prof. Dept. of Sanskrit, Krishnath College, Berhampur, W.B.
13. **Saha Mamani**
Asst. Prof. Dept. of Sanskrit, Berhampore College, Berhampore, W.B.
14. **Kallyadan Anitha**
Associate Prof. and H.O.D,, Dept. of Sanskrit, Govt. Brennen College, Dharmadham, Melur Road, Thalassery, Kerala-670106.
15. **Kundu Sanchita**
Asst. Prof. Dept. of Sanskrit, Hooghly Mohsin College, Hooghly, W.B.

16. **Das Anilkumar**
Asst. Prof. Dept. of Dharma Sastra, Sri Jagarnath Sanskrit University, Sri Vihar, Puri.

17. **Shekhawat Ashok Kawanr**
Asst. Prof. Dept. of Sanskrit, Govt. PG College, Jhalabar (Rajsthan).

18. **Tripathi Debashis**
Asst. Prof. Sri Jaganath Sanskrit University, Puri.

19. **Shinghal Mamata**
Asst. Prof. in Sociology, Govt. Arts College, Kota (Rajsthan)

20. **Bramhachari Suvadip**
Ph.D. Scholar, Dept. of Sanskrit Darsan, Ramkrishna-Vivekananda-Educational Research Institute, Belur Math, W.B.

21. **Singh Poonam**
Associate Prof. Dept. of Sanskrit, DAV, PG, College, Varanasi

22. **Tripathi Prakash Kumar**
Maa Basulee Degree College, Thakurmunda, Maurbhanja-757037

23. **Anilananda**
Asst. Prof. Dept. of Vedanta, Sri Rangalaxmi Adarsha Sanskrit College, Vrindaban, Mathura.

24. **Meena Samay Singh**
Asst. Prof. Dept. of Sanskrit, Govt Arts College, Kota (Rajsthan).

25. **Singhania Monika**
Ph.D. Scholar, Dept. of Sanskrit, Mayabati Rajakiya Womans PG College, Badalpur Gautam Buddha Nagar, U.P.

26. **Pan Santukumar**
Asst. Prof. in Sanskrit H.OD.,Bejoy Narayan Mahavidyalaya, Itachuna, Hoogly-712147, W.B.

27. **Lenka Sulagna**
At. Nischantpur, P.O. - Kuliana, P.S.-Badasahi, Dist. - Manurbhanj, Pin-757025

28. **Pankaj Roul**
Ph.D. Scholar, Dept. of Sanskrit Darsan, Ramkrishna-Vivekananda-Educational Research Institute, Belur Math, W.B.

29. **Tripathi Dhananjay Basudeb**
Asst. Prof. Dept. of Sanskrit, Dr. Shyamaprasad Mukherjee University, Ranchi, Jharkhand-834008

30. **Ratha Durgasaran**
Dept. of Vedabhasya, National Sanskrit University, Tirupati.

31. **Shadhukhan Shyamsundar**
Ph.D. Scholar, Dept. of Adawita Vedanta, Sri Sadashiv, Parisar, Puri.

32. **Das Nepal**
Asst. Prof. (G), Ekalavya Campus, Central Sanskrit University, Agartala-7990210

33. **Kar Ajaykumar**
Asst. Prof. (G), Narendranath Sanskrit Mahavidyalaya Priyabag, Baleswar, Odisha.

34. **Sil Partha Sarathi**
Asst. Prof. Dept. of Sanskrit, Tripura University.

35. **Banerjee Surajit**
Asst. Prof. Dept. of Sanskrit, Ramkrishna Mission Residential College (Auto.) Narendrapur, Kolkata,W.B.

36. **Misra Bidisha**
Asst. Prof. Dept. of Sanskrit, Lady Brabourne College, W.B.

37. **Chhetri Rajat Goutam**
Asst. Prof. Kavikulaguru Kalidas Sanskrit University, Ramtek

38. **Talwalkar Rohit**
1/47, OM Sarvoday Society, M.C. Changala Road, Sahar, Mumbai-400099

39. **Mukherjee Debsujan**
Asst. Prof., Dept. of Sanskrit, Kaliaganj College, Dinajpur (N), W.B.

40. **Chatterjee Srimonta**
Asst. Prof. Dept. of Sanskrit, Tribenidevi Bhaloia College, Raniganjnagar, W.B.

41. **Chatterjee Sandip**
Ph.D. Scholar, Central Sanskrit University, New Delhi.

42. **Behera Harapriya**
Ph.D. Scholar, Sri Lalbahadur Sastri National Sanskrit University, New Delhi.

43. **Mahapratra Nandighosh**
Asst. Prof., Central Sanskrit University, Sadashiva Campus, Puri.

44. **Pati Nibadita**
Maharaj Sri Ramachandra Bhanjadeo University, 2nd Campus, Keonjhar, Odisha.

45. **Tewari Ketan & Bhardwaj Manish**
Law College Dehradun, Uttaranchal University, Premnagar, Dehradun, Uttarakhand, India

46. **Hazra Dibyajyoti**
Asst. Prof. Vivekananda Mahavidyalaya, Burdwan, W.B.

47. **Singh Manu Kumar & Kumar Ashutosh**
Law College Dehradun, Uttaranchal University, Premnagar, Dehradun, Uttarakhand, India

48. **De Arpita**
Asst. Prof. Bethune College, Kolkata-6

49. **Dei Sunell**
Asst. Prof., School of Sanskrit,Gangadhar Meher University, Amruta Vihar, Sambalpur-768004

50. **Das Sujan**
Ph.D. Scholar, Sanskrit Sankaya,Coochbihar Pachanan Barma University, Coochbihar, W.B.

51. **Bag Pradipkumar**
Asst. Prof., Dept. of Sahitya, National Sanskrit University, Tirupati.

52. **Rawat Asha Singh**
Asst. Prof. Dept. of Sanskrit, KRGPG College, Gawalior (M.P.)

53. **Meena Babulal**
Asst. Prof. Dept. of Sanskrit, Maharani Sri Jaya Rajaakiya PG College, Bharatpur (Rajasthan).

54. **Dinda Joydeb**
Guest Lecturer,Laxmi Devi Shroff Adarsh Sanskrit College, Harisharanam Kutir, Kalirakha, B. Deoghar, Jharkhand-814112.

55. **Panda Gyanranjan**
National Sanskrit University, Tirupati. Andhra Pradash

56. **Padhi Kadambini**
Asst. Prof. Ananta Narayan Sanskrit Mahavidyalaya, Kendrapara.

57. **Mustafi Monalisa**
Asst. Prof. Dept. of Political Science, Khalisani Mahavidyalaya, Chandannagar, W.B.

58. **Barman Manteswar**
Guest Lecturer, University B.T. Evening College, Keshab Road, Gunjabari, Dist.-Cooch Bihar, W.B. Pin-736101

59. **Pradhan Nabin Kumar**
Asst. Prof. (G), Sadashiva Campus,Central Sanskrit University, Puri-1

60. **Pal Nitai**
Asst. Prof. Dept. of Sanskrit, Nabadwip Vidyasagar College, Nadia-741302.

61. **Guha Partha Sarathi**
Asst. Prof. Dept. of English, Berhampore Girls' College, Berhampore, Murshidabad, W.B.

62. **Sahu Pradip Kumar**
Asst. Prof. Dept. of Sarva Darshan, Central Sanskrit University, Puri.

63. **Pandya Prakriti**
Ph.D. Scholar, Dept. of Sanskrit, Shramajibi Mahavidyalaya, Janardan Ray Nagar, Rajasthan Vidyapeeth, Udayapur (Rajasthan)

64. **Smt. Devi Purnamasi**
Principal, Krishnapriyadevi Mahavidyalaya, Daspalla, Dist. - Nayagarh, Odisha.

65. **Sharma Radhavallabha**
Asst. Prof. Dept. of Sahitya, Haryana Sanskrit Vidyapeeth, Haryana.

66. **Acharya Ratneswar**
Ph.D. Scholar, Dept. of Sanskrit, Raiganj University.

67. **Ali Shekh Shabir**
Asst. Prof. Sanskrit Sankaya, West Bengal State University.

68. **Mour Shweta & Rao Ashok Singh**
Dept. of Arts, Mody University, Laxmangarh, Sikar, Rajasthan-332311.

69. **Mahata Biswanath**
Ph.D. Scholar, Dept. of Sanskrit, Raiganj University.

70. **Biswas Uttam**
Asst. Prof. Dept. of Sanskrit, Vidyasagar University.

71. **Sahu Pravat Kumar**
Dept. of Vishistadvaita Vedanta, National Sanskrit University Tirupati.

72. **Ratha Bharat Bhusan**
Asst. Prof. Dept. of Sahitya, National Sanskrit University, Tirupati (A.P)

73. **Rastogi Rachana**
Asst. Prof. Dept. of Sanskrit, Diamond Harbar Womens University, W. B.

74. **Sharma Kripasankar**
Asst. Prof. Central Sanskrit University, Bhopal.

75. **Sarkar Mallika**
Asst. Prof. Hoogly Women's College, Hoogly, W.B.

76. **Niogi Prasenjit**
Asst. Prof. in Sanskrit, A.K.P.C. Mahavidyalaya, Bengai, Hoogly, W.B.

77. **Ray Mahapatra Basanta**
Bapujee Govt.High School, Mahatab Nagar, Bhadrak, Odisha.

78. **Mukhopadhyay Parth Sarathi**
Asst. Prof. B.N. Dutta Smrihi Mahavidyalaya, Hatgorindapur, Burdwan.

79. **Pati Biswararanjan**
Asst. Prof. Central Sanskrit University, Sadashiv Campus, Puri-1

80. **Sarangi Buddheswar**
Assoicate Prof. Sri Sitaram Vaidik Adartha Sanskrit Mahavidyalaya, 7/2A, P.W.D. Road, Kolkata-700035

81. **Sen Subhrajit**
Asst. Prof. Gourbang University, Malda,W.B.